- Title – आयुर्वेद रसायन
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning –

- End –

- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author - हेमाद्री
- Remarks- के सूत्रस्थान 'अष्टाङ्गहृदयम्' पर हेमाद्री की आयुर्वेद रसायन नामक टीका है।

A-1 Shelf-4

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

॥ग्र॰वि॰
२

॥अन्यथा कल्पयेत्सदृशान् भागान् प्रमाणं यत्तु नोद्दिष्टमिति मदनफलेन पिप्पल्यादीनां च तुल्यं प्रमाणं प्राप्नुया
त् पिप्पलीमिश्रितान् गलान् यवागूं कृशयेच्छ्रितान् मधुयष्टिकया वा युतान् यवा उष्णाम्बुना माक्षिकयुतेन वास
ह पिबेत् ॥ अथवा यष्टीलोलादीनां पत्रोदकेन वा सह पिबेत् ॥ अथवा तपेल्लादिभिः पिबेत् ॥ अथवा कल्पोदितानि व
मनकल्पोक्तानि वमनानि योग्यानि प्रयुंजीत बलकालविभागवित् ॥ अस्यार्थः इह बलावस्थायां तथा व्याधिबला
वस्थायां वेदं वमनं दातुं योग्यमिति यो विभागवेत्ति स बलकालविभागवित् ॥ कृते कृते वा वमने ज्वरी कुर्याद्बुद्धिमा
बलं दोषाणां समुदीर्णानां पचनाय शमाय च वमनयोग्यो यो ज्वरी स कृते वमने अपरस्तु वमने प्रयो
ग्यः सोऽकृतवमने विशेषेण मुपवासं लङ्घनं कुर्यात् एवं कृतवमनो कृतवमनो वा ज्वरी सर्वथा लंघ
नं कुर्यात् किमर्थमित्याह दोषाणां वातादीनां समुदीर्णानां समंतात् समुच्चानामुत्पन्नानां पाचना
य तन्नार्थं शमाय शान्त्यर्थं च निरामाणां पुनः समुदीर्णानां शान्त्यर्थमेव ॥ आमेन भस्मनेवाग्नौ छन्नेऽन्नं तु वि
पच्यते तस्मादादावेव नवज्वरितानुपवासयेत् दोषेणामारब्धेन वातादिना वा सहैकलोलीभूतेनाग्ना
छन्नेछादितेऽग्नावन्नमामाशयस्थं न विपच्यते भस्मनेव यथा वाह्योऽग्नौ स्थापितेतो यतंदुलादिकं स्थालीस्थं नाव
पच्यते तथैवामाशयस्थमन्नमामेन छन्नेऽग्नौ न विपच्यते यतश्चैवं तस्माद्धेतो रामदोषस्य पूर्वोक्तस्य पच
नं पाकमवधिं कृत्वा ज्वरितान्नरानुपवासयेत् ॥ नवज्वरेऽल्पमुष्णाम्बु पिबेद्वातकफज्वरे तक्रं पवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

ऽमामस्य बलमुत्साहं ॥ अजः परं धातुतेजः क्षपयित्वा तु रक्तं च विधानं गलेशि ह प्रयोगवशादंगीकृतः लंघनेनेति
जातेष्वकुस्ववचनं तेन न कदाचिदेके न लंघनेन कदाचिदनेके दोषक्षये जायत इति द्वयं तत्रोत्क्लिष्टे समुत्क्लिष्टे कफ
प्रायेबलेमले सहृल्लासप्रसेकान्नद्वेषकासविसूचिका सद्योभुक्तस्य संजाते ज्वरे सामे विशेषतः वमनं वमनी
हस्य शस्तं कुर्यान्नदन्त्या या श्वासातीसारसंमोहहृद्रोगविषमज्वरान् तत्र तस्मिन्मले उत्क्लिष्टे स्वजन्मगुणकमले
स्थानतोधिके तथा च कफप्रायेकफबहुले वा तात्स्वपित्तान्स्वेवेति मामप्यो ह्युत्पते समुत्क्लिष्टे स्वस्थानाच्चलिते वहिर
निर्याते तथा बले शिथिले उत्क्लिष्टेपि पिहिकदाचित्स्थानावस्थाद्वलात् एतेदेवकफोत्क्लिष्टादिकं दर्शयति
सहृल्लासप्रसेकहृदि हृल्लासादीनां द्वंद्वः सहते वर्त्तते यस्मिन् हृल्लास उद्वमनमिवानुभवः उद्वमनेच्छा दयस्य
प्रसेकः पानीयस्यैव निष्ठीवनं सद्योभुक्तस्येत्यादि रेहृदेशमलेसति सद्यः कृताहारस्य ज्वरे संजाते विशेषेण सामे
ज्वरे वमनमर्हस्य वमनं शस्तं वमनार्हो वमनविरेचनाविधौ प्रोक्ताः ॥ अन्यथा तु ज्ञाविधिविपर्ययेण तद्वमनं कृतं श्वा
सादीन्कुर्यात् तथानुत्क्लिष्टेऽकफप्रधानः स्थिरे हृल्लासादिरहितो विपरीतः वमनद्रव्याण्याह पिप्पलीभि
युतान् गालानकलिंगैर्मधुकेन वा उष्णमम्भसा समधुना पिबेत्सलवणेन वा पटोलनिंबकर्कोटवेत्रपत्रोदके
नवा तर्पणेन रसेनेक्षोर्मद्यैः कल्पोदितानि वा वमनानि प्रयुंजीत बलकालविभागवित् गालानमदनं ॥ अस्य
बनिरपायत्वाच्छ्रेष्ठत्वाच्च पिप्पल्यादिद्रव्येभ्यो तेन महोपयोगिभ्यो बहूपयोगितया प्रधानत्वमस्यान्मगुपन्यासः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पर्पटोशीरसाधितं शीतं तेभ्यो हितं तोयं पाचनं तरुणज्वरापहं तेभ्य उद्रिक्तपित्तादिभ्यः पिपासितेभ्यो घनादिसा
ज्व.चि. धितं शीतं तोयं हितं पानीयसाधनेवतं त्रातरेविधिरुक्तो यथा कर्षं गृहीत्वा द्रव्यस्य तोयस्य प्रस्थमाव
३ पेत् अर्द्धावशेषं तत्क्वाथं तोयमानेत्वयं विधिरिति ७ उष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना तस्मा
त्पित्तविरुद्धानित्यजेत्पित्ताधिकं धिकं पित्तं विनाकुष्मा न विद्यते ज्वरस्तु उष्मणा विना नास्ति संतापलक्ष
णत्वात् ज्वरस्य यतश्चैवं तस्माद्यानि पित्तस्य विरुद्धान्याहारविहारादीनि तानि सर्वास्मिन्ज्वरे त्यजेत् पि
त्ताधिके पुनरधिकं कृत्वा अतिशयेन त्यजेत् पित्ताधिक इत्यत्राधिकग्रहणे नेदं प्रतिपादयति सर्वो ज्वर
स्त्रिदोषजो यस्मात्तदपादृश इति ॥८॥ स्नानाभ्यंगप्रदेहांश्च परिशेषं च लंघनं न केवलं ज्वरे पित्तविर
द्धानि त्यजेत् यावत् स्नानादीश्च त्यजेत् स्नानादीनामपि तेषां हरत्वाशंकया सत्यत्वे प्राप्ते अचिंत्यप्रभावत्वा
त् ज्वरे विरुद्धानीति तत्सेवनं निषेधति प्रदेहश्चंदनाद्यनुलेपः परिशेषं च लंघनं त्यजेत् यल्लंघनमु
पयुक्तमुपवासलक्षणं ततो यदन्यत्तत्परिशेषं शक्त्याद्येकादशप्रकारं च तत्त्यजेत् उपवासलक्षणं तु लं
घनं नवज्वरे कर्त्तव्यमेव ।९। अजीर्णे इव शूलघ्नं सामे तीव्ररुजि ज्वरे न पिबेदौषधं तद्धि भूय एवाममाव
हेत् आमाभिभूतकोष्ठस्य क्षीरं विषमहेरिव यथाजीर्णे सामे तीव्ररुज्यपि शूलघ्नमौषधं न पिबे
त् हि यस्मात्तदौषधं पीतमस्याममवस्थायां भूय एवाम स्तत्कोपयमयात् तथैव सामे ज्वरे दारुणपीडा
व तित्तदानीमामपक्वायथैर्मुस्तापर्पटकाद्यौषधं न पिबेत् हि यस्मात्तदौषधं पीतमस्याममवस्थायां भूय राम

३

लयंतीनानस्रोतसामार्द्दवं जनयेत् उदीर्य चाग्निं स्रोतोभ्यो मृदूकृत्य विशोधयेत् नीलपित्तानि
लस्वेदशकृन्मूत्रानुलोमनं निर्द्दोषाद्विहरं प्राणानामवलंबनं विपरीतमतः शीतेदोषसंघातवर्द्धनं तस्मा॰
वान्तेरोगत्यार्त्यं स्तोकं वातकफज्वरे उष्णांबु पिबेत् तस्मिन्मितिस्त्वपित्तखेनं निर्दिशति नजिद्द ॰अल्पाल्पमिति प्राक
रेगुणकारेगुणवचनस्याद्दितं तदुष्णांबुपीतं कफं वातस्यानं विलयं नीत्वा विलीनं विग्रहतामापाद्य तस्मान्मास्तुनि
वर्त्तयेत् तथाग्निमुदीर्य सामिदहं कृत्वा स्रोतांसि विशोधयेत् किंकृत्वा मृदूकृत्य तेषां स्रोतसां मार्द्दवमुत्पाद्य तथा
लीनान्यप्रवृत्तस्वरूपाणि च तानि पित्तानि लस्वेदशकृन्मूत्राणि तेषामनुलोमनं प्रवर्त्तनं तथा प्राणानां जीविता
स्यानामवलंबनं तदुष्णजलमाश्रित्य तथा प्राणाः प्रवर्त्तन्ते इत्यर्थः ॰अनेन चोष्णांबुकमेकघनव्याजेन वातक
फज्वरस्वरूपमपि किंचित्प्रकाशयति तथा वातशोषितेन कफेन स्तानीभूतेनान्तर्दृष्णा जायते तथाग्निकम
ग्निमांद्यं स्रोतसामसुद्दत्वं तथा लीनानि पित्तादीन्यत्रस्फुरिते ७ उक्तमेवं गुणत्वेपि कुर्यान्नैकान्तपित्ते उ
द्रिक्तपित्ते दाहभ्रमोह्वातिसारिणि विषमद्योत्थिते ग्रीष्मे क्षतक्षीणे रक्तपित्तिनि एवं गुणमप्युष्णांबु एकांत
पित्तजे केवलपित्तले ज्वरे ज्वरिणि न युंज्यादिति तथा उद्रिक्तमधिकं पित्तं यस्मिंस्तत्र न युंज्यात् तथात
दुष्णांबुदवथ्वादिमति नरे न युंज्यात् चक्रवादिभ्यो यस्ती वृ[illegible]ष्मा प्रवर्त्तन्ते स दवथुः सर्वांगीणास्तीव्रकुष्मा
दाह मोहभ्रमः तथा विषमद्याभ्यामुत्थिते जाते ज्वरे तथा ग्रीष्मकाले तथा क्षतश्च क्षीणश्च क्षतक्षीणः क्षतः
क्षीणो धात्वपचयवान् तस्मिंस्तथाभूते नरे युंज्यात् तथा रक्तपित्ते निरक्तपित्तवति ७ घनचंदनशुंठ्यंबु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

च्री
४

ग्यावस्था इत्ययं षडहेनेत्यादिना वा निर्दिष्टः कालयोग्यावस्था युक्तं लंघितलिंगैरुक्तमित्यादिना प्रयायो
ग्यावस्था उद्दिष्टा पित्रादिना वातिक्रान्तः क्षेपयोगयोग्यावस्थेति यथावस्थं दृष्टव्यं क्रमस्तु यथा वातश्लेष्मके सामे ज्वरे
प्रथमं लंघनं कुर्वीत च स्वेदनं द्वित्र्यादिदिनलक्षणं च कालं लंघितलक्षणयुक्तस्य यवागूवादि पेयाद्यन्नमुक्त
स्यानंतरं मुस्तापर्पटकादि तिक्तरसोपयोगः इति क्रमार्थः ज्वरे लंघनं कुर्वीतेत्युक्तं ग्रस्य विशिष्टविषये पवादमा
ह। ग। शुद्धवातक्षयागंतुजीर्णज्वरेषु लंघनं नेष्यते शुद्धेन वातेन मदोषाद्युद्धेन यो ज्वरः स शुद्धवातज्वरः क्ष
यणधात्वपचयादिलक्षणेन यो ज्वरः स क्षयज्वरः प्रत्यग्नेत वि वायुनिःसंप्रहारादिसमुद्भवः स आगंतुज्वरः
यथाप्रक्तरणो ज्वरः स जीर्णः ते विद्यंते ये बांतरएवंभूतास्तेषु लंघनं नेष्यते तेषु तर्हि किं कार्यमित्याह। ग।
तेषु हितं शमनं यत्न करोते न हिय स्मात्तेषु शुद्धवातादिज्वरेषु शमनं हितं शमनं स्य च संतर्पणं यत्तर्पण रू
पणं हि विधातं किं तच्छमनं तेभ्यो हितमित्याह। यत्न कर्षणं बृंहणमित्यर्थः यद्येवं ततस्य ष्टमेव बृंहणमित्ये
तदेव कस्मान्नोक्तं किं शमनं यत्न कर्षणमिति पदद्वयोपादनेन कः मः प्रयोजनार्थमेतदुक्तं तथा वाय
मथो विशिष्ट उभयोपादानेन प्रकाश्यते यथान सर्वे सार्विकयापहृद्रूपणं शमने तत्तेभ्यो हितं किं तर्हि किं
चिद्बृंहणं शमनं तत्तेभ्यो हितमिति। ग। तत्रेत्यादि तत्र सामज्वराकृत्या जानीयाद्विशोषितं द्विविधोपक्र
मज्ञानमवेक्ष्य तत्र लंघने तेषु ज्वरेषु मध्ये सामज्वरस्याकृत्या लक्षणेन ज्वरोपद्रुवतीदणास्त्वमित्यादिना ग्रवि
शोषितमलंघितं विद्यात् लंघने लंघनलक्षणं पेयादि द्विविधोपक्रमज्ञानं द्विविधोपक्रमणीयाध्याये क्त

राम
४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवमामावस्थत् अत्र च सामरस्तु केवलामर इति गम्यते अल्पेष्वजीर्णे भेषजमनुज्ञातमेव तथा चोवाच तंत्रकारः
जीर्णेशने तु भैषज्यं युंज्यात्स्तब्धगुरूदरे दोषशेषस्य पाकार्थमग्नेः संधुक्षणाय चेति तस्माद्बहुलामर इति बोध्यं अ
पात्र हृस्तमाह दीर्घे विषमहेरिव यथा हीर्घविषघ्नमप्यभिहितमहीनां तदेव विषं कुर्यात् ।७। सोदर्दपीनस
श्वासमे जंघापर्वास्थिमूलिनि वातश्लेष्मात्मके स्वेदः प्रशस्तः स एव नेयत् स्वेदमत्र शास्त्रहातावकुर्यात् द
गेन्प्रपाटवं उदर्दः हृदयः प्रागुक्तः उदर्दस्य पीनसस्य श्वासस्य च तेः मस्त्रवन्नेत यो ज्वरस्तस्मिन् तथा जंघाच
पर्वास्थि च अस्थीनि च तत्र शूलं तद्विद्यते यस्य तस्मिंश्च तथा वातश्लेष्मात्मके वातकफोद्भवे स्वेदः शस्तो
हितः यस्मा च चितः स्वेदादीन् प्रवर्तयेत् अग्नेश्च पाटवं दीप्ततरत्वं विदध्यात् ।८। स्नेहोक्तमाचारविधिं स
र्वशस्त्रानुपालयेत् तथा स्नेहोक्तं स्नेहविध्यध्याये कथितमाचारविधिं च सर्वेशोनुकुर्यादित्यर्थः ।९। लंघ
नस्वेदनकालो यवागूवस्तिक्तकोरसः मलानां पाचनानि स्युर्यथावस्थं क्रमेण वा मलानां वातादीनां एव
कस्थितानां संसर्गस्थितानां सन्निपातस्थितानां च सामर्थ्याल्लंघनादयस्तिक्तरसा वा स्या नां पाच
नानि स्युः यथावस्थमवस्थानतिक्रमेण कस्यांचित् ज्वरावस्थायां लंघनमुपवासलक्षणं मलानां पाचनं
स्यात् कस्यांचित् स्वेदनं स्यात् कस्यांचित् यवाग्वः पेयाः कस्यांचित्तिक्तकोरसस्तिक्तरसाश्रितद्रव्योपयोगः
एवमवस्थावशाल्लंघनस्वेदनं च कृत्वा षडहादूर्ध्वं यवागूवस्तिक्तकोरसः पाचनान्यविपक्वानां मलानां तरु
णज्वरे स्युः तत्रामाशयस्थ इत्यादिना ग्रंथेन निर्दिष्टो लंघनयोग्यावस्था सोदर्दपीनस इत्यादिना स्वेदनयो
नादयस्तिक्तरसांतास्तामलानामेकैकशः पाचनानि स्युः अथवा क्रमेणैव पाचनानि स्यु यथा लंघनेर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

7

पिबेद्दोषसम्भूतोवा सांत्वं पेयान्नवज्वरे इति कियंतं कालं ज्वरितं पेयाभिरुपाचरेदित्याह षडहमित्यादि पेया
अ.टि. भिर्ज्वरितं षडहं यावदुपाचरेत् षण्णामह्नां समाहार स्तद्धितार्थोत्तरपदेत्यादिना समासः राजाहःसखिभ्यष्टजि
ति टच् न सरूपादेः समाहार इत्यनुदेशः अह्नष्टखोरेवेति टिलोपः तथा षडहाद्वेगापि यदि शांते ज्वरः तदा दोष
५ द्रव्यापेक्षया भक्तयूषादिभिरुपाचरेदिति आमादृतुगमयति मद्रुत्वे चेति अथवा षडहे तीतेऽपि यावत् ज्वरो
मार्दवं गच्छति तावत् पेयाभिरुपाचरेत् ननु तर्हि किं षडहं चेत्यनेन अत्र केचिदेव माहुः षडहादर्वाक् प्रायेणाम
द्रुतायामपि जातायां षडहं यावत् ज्वरितं पेयाभिरुपाचरेदिति द्योतनार्थं षडहं चेति कृतं अपरे तु काल एव
बाहुल्येन ज्वरमार्दवस्येति तत्र पेयानां च मिदं कृतमिति मन्यन्ते ज्वरमार्दवेनु जाते पाचनादियोगः कार्यः तथा चव
दन्ति ततः पक्वेषु दोषेषु लंघनाद्यैः प्रशाम्यते कषाय इति अथ तामेव पेयामनुपक्रमते । ७ । प्रागलाजा
पेयां सुजरां सशुंठीधान्यपिप्पलीं ससैंधवां तथाम्लार्थी तां पिबेत्सदाडिमां प्राक्सर्वेभ्यः पेयाभ्यो लाज
पेयाम्लो लाजपेयां पिबेत् ननु यवागूप्रकृतिजां पेयं कीदृशीं सुजरां अल्पलाजत्वात् यस्माच्छीघ्रं जरां याति
तां तथा सशुंठीधान्यपिप्पलीस[illegible]शुण्ठ्यादिभिः सृतामिति बोध्यं अत एव ससैंधवामिति पृथक् निर्दिष्टं अ
ठी२ न्यथा सशुंठीधान्यपिप्पलीससैंधवामिति निर्देशं कुर्यात् मुनिरप्याह लाजपेयां सुजरां पिप्पलीनागरैः सृता
मित्यादि ससैंधवामित्यत्र सशब्दस्य ईषत्पर्यायत्वात् अल्पसैंधवामिति बोध्यं[illegible] तथाम्लपा पीयो ज्वरी राम ५

लक्षणं चावेक्षेत लक्षणं च वैमल्ये इंद्रियता सर्ग इत्यादि ।८। युक्तं लंघितं [illegible] लिंगैस्ततः पेयाभिरुपाचरेत् यथा
सौषधसिद्धाभिर्मंडपूर्वाभिरादितः तस्याग्निर्दीप्यते ताभिः समिद्भिरिव पावकः यद्दा मृदुत्वे वाज्वरो या
वद्वा पुयात लंघितं लिंगैर्विशोषितं लक्षणे युक्तं ज्वरितं नरं तस्मात्तं पेयाभिरुपाचरेत् किंभूताभिः यथा
सौषधसिद्धाभिः यद्वाल्पस्य यथा स्वमिति वीप्सायामव्ययीभावः यथा सैव तदौषधं च यथा सौषधं वातादेः एय
ग्नस्तस्य समस्तस्य सन्निपतितस्य यद्यस्य यो यमौषधं तेन सिद्धाभिर्विस्पमाले पेयादिद्रव्यैर्येयाय पेयैः सेवेः क्र
ताभिरित्यर्थः किंभूताभिः मंडः पूर्वैः प्रथमोऽभ्यवहारो यासां ता मंडपूर्वा इत्क्रियारव्येयं एतद्धिव्याख्यायमाने स
वीसां पेयानां मंडपूर्वाणां ज्वरेभ्यवहारः प्राप्नोति ततस्तु स्वस्थ विरुद्धं बहुपिच्छो वा समंतु वीमात्सिकां दिमां पेयांपि
वेत् तामपि मंडपूर्वांपिवेन्नकेवलामिति एतद्व्क्रियमाणं विरुद्धं स्यात् तथा कथितामलकेग्रत्यये पिद्गश
मनेघुमंडः तयाघुवहुपिन्नो ज्वरी वा मंडः स्मृतः पिप्पलीमुद्गयुक्तो लाजानां बुद्धिमेनिनेत्येवं स्वरूपः पेया
यास्तु ज्वरघ्नत्वमुक्तं न यास्तेपि सम्यक् लंघिते त्वालामंडात् किंचिद्धनाभिः पेयादिभिरसावुपचरणीयः न
स्यज्वरेण स्ताभिः पेयाभिरग्निर्दीप्यते समिध्यते समिद्भिरेधैर्यथा वाह्यपावकः मुनिनाप्युक्तम् तास्तु भेष
नसंयोगाल्लघुत्वाच्चाग्निदीपिकाः स्वेदना यद्वा यो स्वलत्वात् मृदुत्वात् तट प्रशांतये आहारभावात् प्राणायसर
त्वाल्लाघवाच्च ज्वरघ्नो ज्वरसात्म्यत्वात् तस्मात् पेयाभिरादितः ज्वरानुपाचरेद्धीमानिति खारणादेष्युक्तं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंभूतां पिप्पल्यामलकैः कृतं तथा सर्पिषा तद्धि सम्यगाज्येन संस्कृतं तथामलः पुरीषादिर्दोषो वातादि
ष.वि. स्तेषामनुलोमनी स्वमार्गप्रवर्तिनी। ७ चविकापिप्पलीमूलद्राक्षामलकनागरैः कोष्ठविबद्धे सरुजि को
६ ष्ठे विबद्धे विबद्धदोषाधिष्ठाने तथा सरुजे चविकादिभिः साधितां पेयां पिबेत्। ८। पिबेत्परिकर्तिनि कोल
वृक्षाम्लकलशीधावनीश्रीफलैः कृतां गुदस्रावेदनिद्रुसव्यात्रांसि मलकनागरैः सिताबदरमृद्वीकाशारिवा
मुस्तचंदनैः तृष्णाछर्दिपटीदाहज्वरघ्नीं क्षौद्रसंयुतां तु पुनरर्थे परिकर्त्तनं परिकर्तछेदनमिवानुभवः
स यस्मात्तस्मिन्परिकर्तिकोष्ठे तस्मिन्परिकर्तिनि तु कोष्ठे कोलादिभिः साधितां पेयां पिबेत् श्रीफलं बि
ल्वफलं। ९। कुर्यात्पेयौषधैरेव रसयूषादिकानपि पेयादिषु हेरैरौषधैर्मांसरसादयोऽपि पेयाया योगं
कर्त्तव्याः तथाच संग्रहेप्यागीहः कुर्यात्पेयौषधैरेव रसयूषादिकानपि रसोत्र मांसरसः यूषा मुद्गादि
संबंधिनः क्वाथाः अत्रादिग्रहणात् पानीयमस्तु तक्रव्यंजनादयो गृह्यंते पेयादिषु बहुद्रव्यपरिमाणादिषु प
दार्थेषु दशाद्युक्तिभागा अवगंतव्यं तथाच तंत्रांतरे पेयायूषरसाद्येषु रसालापानकादिषु द्रव्यमात्रं
प्रयुंजीत लोकसिद्धं यथार्हतः इति यस्य पुंसो यत् परिमाणे द्रव्ये मात्रा योग्या तस्य तत्परिमाणैरेव पेयाद
यः कार्या इत्यर्थः अन्ये त्वेवमन्यंते पेयायूषरसाद्येषु द्रव्यपरिमाणमल्पमेव कल्पयितव्यं पानार्थं च यत्
द्रव्ये साधितं तोयमुक्तं तदल्पपरिमाणद्रव्यैरेव साधनीयं अल्पपरिमाणेनैव हि द्रव्येण तद्योयं सम्यग्भवा
च्यते तथाच खारणादिरपाठात् बहुद्रव्यो घनः क्वाथः स्वच्छमल्पौषधं जलमिति अथ पाक्रिया सामान्ये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रहं ग्राययेत सतां पंचकोलांपेयां सदृदाडिमां पिबेत पूर्वस्याः पेयायाःसदाडिमत्वमेवास्याविशेषः कोपसर्जेन
चेतिसहशब्दस्य समभावः ।७। रक्तशालिवृहत्पिप्पल्योवा सशुंठीमाक्षिकांहिमांपिबेदितिवदंते। रक्तशालिरामित्रवर्चा
हरीबहुपिप्पल्योवा सशुंठीमाक्षिकांहिमां पेयांपिबेन्नो कांनान्यथायोज्वरी धान्यपिष्ठन्यावन्नान्याद्येशुंठी
गृह्णातु ग्रत्रच शुंठाः दूष्ये मध्ये मधोगा मधुरपा कत्वादग्निमांद्योत्मा रुलेपद्मीलशक्तित्वात युक्तः पिप्पे
वयोगाः एवमन्यत्रापि शुंठ्याप्रयोगो विंत्यसंधवे तुताकन्मात्रेमर्वत्रविरुद्धमेव ।७। वस्तिवास्थशिरःशूलीच्या
घृगोगहस्रसाधितां वस्यादि शूलीच्या घृगोगहस्रसाधितांपेयां पिबेत ।७। पृश्निपर्णीबलाबिल्वनागरोत्पल
धान्यकैः सिद्धांज्वरातिसारपेयांपेयांदीपनपाचनी पृश्निपर्ण्यादिसाधितां पेयांदीपनपाचनीज्वरातीसारवा
नमूलांपिबेत दीपनीचासौपाचनीचेतिपुंवत्कर्मधारयेतिपुंवद्भावः ग्रत्रापि ग्रहत्तनकद्वंशं पतः सर्वत्रपेया
प्रसंगे ग्रम्लाधौयोज्वरी सदाडिमां पेयां पिबेदित्युक्तं तस्मात्किमनेन ब्रूमः ग्रम्लामिलाघौभवतुवामाभवतु त
थाप्यम्लामेवज्वरातीसारी पिबेदित्यस्यायोद्योतनार्थमम्लामित्युक्तं ।७। ह्रस्वेनपंचमूलेन सिद्धांपेयांहि
हिक्कारुकश्वासकासवान् पंचमूलेनमहतावकफार्त्तो नरोपिबेत यवसाधितां शिथिवर्चाः सप्तवापिबेल्या
मलकैःश्रतां यवागूंसर्पिषाभृष्टां मलदोषानुलोमनी पिबेत्सिद्धामित्यत्रवदंते ह्रस्वेनवृहत्यादिनापंचमूले
नसिद्धांपेयांहिध्मादिमान्पिबेत कफार्त्तोनरोबिल्वादिनामहतापंचमूलेनसह यवसाधितांपिबेत तंडुला
एवात्रप्रकृतित्वेनयोज्याः यवागुंकाथएवविबद्धंविष्ठच्छेवर्चः पुरीषंयस्यानरस्यसनरःसप्तवांयवप्रधानांपिबेत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्व॰चि॰ ७

ॐ

वागःपानादेनरेयवाग्वंजीर्णायांलघ्वन्नपुरस्तोजातबुभुक्षःसन् द्वितीयेन्नकालेदनमश्नीयात् किंभूतं
भृष्टतण्डुलायस्मिन् किंकेवलमोदनंभुंजीतनेत्याह इत्येत्यादि इत्कलावणिकैः तुलत्थादीनांसंबं
धिभिर्यूषैः क्वाथैरोदनमश्नीयात् अथवाऽप्रवक्ष्यावशामुद्गलावजैरोदनमद्यात् मुद्गलावजैरितिव
क्ष्यरसैरितिपृथक्निर्देशोलावजरसाधनेप्राधान्यज्ञापनार्थं तथालावजरसाःसंस्कार्याःसंस्कार
कास्तुमुद्गाःअतएववृद्धमात्रा णांलावानामल्पानांचमुद्गानामत्रोपयोगःकार्यइत्यवतिष्ठते नातिमां
सास्तनुरसाद्दकलावणिकाःस्मृताइतिकेचिदाहुः अन्येत्वाचक्षते अल्पमांसपद्मेनहोदकलावणिकाइति
इत्यर्थःषडहेनेयोबलंदोषंचरक्षता इतिपूर्वोक्तेनप्रकारेण प्रथमोज्वरस्यषडहेनेयोतिवाह्योनान्यज्व
रस्यसंबंधीत्ययमितिनिर्देशाल्लभ्यतेकिंकुर्वताभिषजाषडहेनेयःबलेरक्षता तथादोषतत्कालेसामं
तद्यन्यतमंपृथक्संसृष्टंसन्निपतितंवा ततज्वरकारणंरक्षतातद्धंतोकुर्वताततथाऽप्रसोदोषःक्षसा
ध्यतामसाध्यतांवानयाति अत्रचयदिकेवलबलरक्षार्थंसंतर्पणंक्रियेत तथासंतर्पणस्यामवृद्धिहेतुत्वात्सा
मोदोषोवर्द्धते अथामदोषक्षपणार्थमपतर्पणंकुर्वीत तदाबलहानिःस्यात् तस्मान्मध्यमपारक्षा
अविरोधेनवैद्येनोभयंरक्षतोपक्रमःकार्योनात्रावहेलाकार्येत्यर्थः।७। ततःपक्वेषुदोषेषुलंघनाद्यैः
प्रशस्यतेकषायोदोषशेषस्यपाचनःशमनोपवा लंघनाद्यैस्तिक्तरसावसानैस्तत्कालोचितैर्ज्वरिकार्है
सामसमलपक्षहेतुभिःपक्वेषुदोषेषु ततःषडहादूर्ध्वंकषायःप्रशस्यते मुस्तापर्पटकादिःपाचनःप्राम

राम ७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ण्यस्योभयस्य पृथक्संज्ञाविनिर्देशो द्रव्यपरिमाणभेदादयं क्वाथ इदं जलमिति ज्वरिणं च प्रथमं यथाऽप्रक्षाः पे
यादेयाः तथा षडङ्गमप्रक्षाः एव देयाः अथ पिनासाः मयानक्वाथो प्यते । ववडुपरिमाणद्रव्यसाध्यत्वेहु नत
यातिक्तरसद्रव्यकृतापि प्रथमं ज्वरे देयं हि अस्वेदनिद्रानरस्तृष्णार्त्तस्य मितादिभिः साधितं । एवं पिवेत् किं
सर्वत्र ज्वरे सर्वाः सर्वदा सर्वस्मिन्देशे पादेया नेत्याशंक्याह । ० मद्योद्भवे मद्यनित्ये पित्तस्थानगते कफे ग्री
घि ष्मे तयोर्वाधिकयोस्तृड्दाहदाहपीडिते उर्द्धप्रवृत्ते रक्ते पेयपेयानेकं ति मद्योद्भव इत्यादि षड्पर्यंगु पेयानेकं ति मुनयः
तिशयः मद्येनोद्भवति यस्तस्मिन्मद्योद्भवे ज्वरे तथा मद्यनित्यपुरुषे तथा कफे पित्तस्थानगते सति तथा ग्री
ष्मकाले तथा तयोर्वाधिकयोः तयोरिति पित्तकफयोः परामृश्यते पित्तकफयोर्वाधिकयोः पित्तस्थानगते
न कफ इत्यत्र तयोरेव प्रक्रान्तत्वात् तथा तृट्छर्द्दिदाहैः समुदितैः पीडितपुरुषे तथा ज्वरास्तस्मिंश्च प्रत्येकं तु तृड्दाहे
वज्ञातेव अस्वेदनिद्रतस्तृष्णार्त्तस्युलैः दाहार्त्तेपि सक्षणविद्वत्पित्ते चेत्याह तथाधःप्रवृत्ते रक्ते ज्वरस्तस्मि
न्नपेयानेकं ति तेषु तर्हि किं कार्यमित्याह । ० । तेषु तु ज्वरापहैः फलरसैर्युक्तं वा लाजतर्पणं पिवेत्सशर्करामधु कं५
तेषु पुनर्विषयभूतेषु लाजतर्पणान् लाजसक्तून्पिवेत् । पिवावसरे ननु यवसक्तून पिवेत् ज्वरापहैः फल
रसैः द्राक्षादीनां ज्वरघ्नानां फलानां रसैः स्वरसैः अथवा तद्रसैः क्वाथैः अथवा वहुजलैः क्वथितशीतलैरित्यर्थो
द्रष्टव्यः किंभूतान् लाजतर्पणान् सशर्करामधून् । ० । ततो जीर्णे च तर्पणे यवागूं वा मोदनं वा हुतानश्रीयादूष
तंडुलं दकलावणिकैर्यूषैः रसैर्वा मुद्गलावजैः ततस्तर्पणपानात् ततरं जीर्णे तर्पणे यवागूं वं वेति य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

13

प्र.टि. ८ संस्कारेण धातुमनुमतानि स्वकलान्यायतिक्तान्यनक्तानि किंतर्हि विशिष्टप्रभावत्वं दर्शयंति घनादीन्येव विशि-
ष्टप्रभावत्वं चान्यत्रापि दृष्टमेव यथा शमीफलं मधुरमपि केशघ्नं तथा ग्रस्तमप्यामलकं पित्तकफघ्नं सैंधवं
लवणमपि चक्षुष्यमित्याद्यन्यदप्यूह्यं तस्मात् कृतादीनां पाचनीयसंस्कारो यथा योगं न वज्रेपि दिशति । तिक्तः पित्ते
विशेषेण प्रयोज्यः कटुकः कफे कषायस्तिवत्येते ज्वरस्य प्रकृतत्वात् पित्तज्वरे तिक्तः कषायकल्पना प्रयोज्यः इति
तिक्तः पित्ते विशेषेणेत्यत्र विशेषनिर्देशो यदोषा हि पित्तज्वरे तिक्तरसाधिष्ठितद्रव्यकषायप्रयोगस्य प्रयोज्यत्वेन के-
लं पित्तज्वराख्यव्याधिदोषघ्नत्वात् तथा तिक्तो रसो निसर्गात् एव ज्वरघ्नः शास्त्रेस्मिन् पठितः यथा तिक्तः स्वयमरोचि-
ष्णुररुचिं हन्ति तृड्विषं कुष्ठमूर्छाज्वरोत्क्लेददाहपित्तकफाञ्जयेदिति मुनिरप्यवोचत् तिक्तो रसः स्वयमरोचिष्णु-
रप्यरोचकघ्नो विषघ्नः कृमिघ्नो मूर्छादाहप्रशमनस्त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्न इत्यादि तस्माद्युक्तमेव यथा तिक्तर-
सस्य ज्वरघ्नत्वं तथा नान्येषां रसानामित्यवेहि दुष्टादिसद्द्रव्यस्य तिक्तरसत्वादेव ज्वरघ्नत्वस्य प्रतिपादितत्वा-
दिति पुनर्यत् ज्वरघ्नत्वमुक्तं तच्छास्त्रोक्तमेवेति बोध्यं गुडूच्याश्च मुनिर्गुणानाह यथा तिक्ता मता त्रिदोषघ्नी ग्राहि-
ण्युष्णा रसायनी दीपनी ज्वरतृड्दाहकामलावातरक्तानुदिति एवमन्येषामपि द्रव्याणां माधवसामर्थ्यं गु-
णैर्बोध्यमित्यूह्यमपि पुनरुच्यते तन्मेषां तत्स्यकर्मणः शङ्कोत्क्षिप्य बोध्यं कटुक इत्यादि कटुरसाधिष्ठितो ज्वरघ्नद्रव्य-
विशेषतः क्वाथः कफे कफज्वरे प्रयोज्यो न तु यः कश्चित् कटुकद्रव्यकषायः सर्वेषां ज्वरघ्नत्वानुपपत्तेः यस्मा-
त् द्रव्यप्रभावाद्विशिष्टमेव कटुरसाधिष्ठितं किमपि यत् द्रव्यं तत् ज्वरघ्नमिति मंतव्यं एतदेव च तस्मात्त्वायंग्रे

राम ८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्येन पाचनसंज्ञया विहितत्वात् तथा वक्ष्यमाणः कलिंगकादिरुद्दिष्टो कसमापनः पंचप्रकारः शमनः प्रशस्यते प्रा
धान्येन शमनसंज्ञया विहितत्वात् तथा चाभिधास्यते तंत्रकृता पंचैते संततादीनां पंचानां शमना मता इति तदेतदुभ
यं पाचनशब्देनोक्तं त्यादिष्टो मुस्तापर्पटकादिः शमनश्चोक्तं त्यादिष्टः कलिंगकादिः कषायः स्याद्यः प्रशस्यते कषायपाच
नत्वात् दोषशोषस्य अत एव पक्केषु दोषेषु लंघनाद्यैरित्यल्पपक्केषु पक्कप्रायेषु वा दोषेषु दोषेष्विति
दोषमन्यथापक्कस्य पाचनमयुक्तमिव स्यात् पिष्टपेषणन्यायेनानर्थकत्वात् तथा चापक्वेषु पहृत्सुजाते तदग्निः
पचति पचंतमग्निं पाचनः पाचयति एवं च पाक्याभावात् किमग्निः पचतु किं वा कषायः पाचयत्वित्यनुपपन्न
मिवैतत् स्यात् यदा पुनर्मुस्तापर्पटकादिः कलिंगकादिरन्यो वा कश्चित् कषायः कफाद्यन्यतमो वा तादृशो दोषज्वर
नो६ शांत्यर्थं प्रयुज्यते तदा पाचमेवन्नपि शमनसंज्ञेन पाचनसंज्ञः ननु प्रथम एव दिने तिक्तरसकषायमनुजेने
तं तत्र कृतं तथा चोवाच घनचंदनशुंठाम्बुपर्पटोशीरसाधितं शीतं तेभ्यो दद्यात्तोयं पाचनं तृड्ज्वरापहमिति त
त्कथमेतत् अत्रोच्यते ॥ ज्वरितः प्रसक्तं न षोडशं पानं किंचिद्धि तरुणीयनवमद्येक्षुरसदधिमस्त्वारनालक्षीरा
दीनामप्रयोज्यत्वेपि ज्वरे पेयं विधानि निषिद्धानि तत्र कृद्भिः शिशिरजलमप्यामदोषस्रोतःसंरोधाग्निमांद्यादी
नावहेत् ज्वरं गाढतरं कुर्यात् तस्मात् पानार्थं तिक्तसाधितमुष्णं तु मेने द्रव्याणि चात्र स्वल्पमात्रयैव योज्यानीत्य
नेतरमेव प्रत्यपादि किं च ज्वरितः तृषितो जलं बहुशो धं पातुमपि न क्षमेत किं च कति पयान्येव घनादीनि जल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

म्न पटोलबकवटो नावा ही व षौ निम्बयोस्तोयपटोलबकवटादीनाभ्यां पटोलबकं वराङ्गाद्देति पटोल
वटादिः नयाव्यमेनो धपि व्यलेनि वटादिः ज्ञीलेद्दी एतत्वात्तज्ञी एतत्वयेनसि शुष्ककरी
क्रियाकार्यतिशेषः शुष्कलमति शयेनसंव्याधिस्पर्शः संशुद्धाविदद्भ्रमेसापिहिंगुमेव्यादिसा
धुत पिवेत इति संशुद्धः कृतवमनविरेचनो विदग्धमेविदग्धत्वसहविरेचनस्यानुरोधने पिवेत
किंभूतं हिंगुसव्याद्दि साधितं मन्नाद्दिपाहोत्यवस्थावाचीतेन संमहाद्गस्य हिंगुरुत्ती रवि
त्रकवियंगुसमगामरुत्तातासिद्धत्वेगचावचूर्णप्रतीवापमित्यस्य पाठस्य सूचेनाभवति
हिंगुसव्याग्नि साधितमित्यपरेवपुः नत्र साधानु विशेषमत्रविदग्धमित्युवाच नत्र कृते
हिंगुसव्याग्नि साधितमित्यपरेवपुः नत्र साधानु विशेषमत्रविदग्धमित्युवाच नत्रकृते
ति मस्यचिकित्सावदिष्टाक्रमः किं चैतत्साधनाव्यस्यास्तीति प्रतियाद्द्यितुं चिकित्सामुप
दिदेश शास्त्रकारः अत एव मत्रे तेस्य साधानाच्चिकित्सानापादिशत् मत्रप्रभान्तेवृवि
दग्धभान्तेवपारव्यसाधत्वादेवापरूमंतनाभ्यधात् वातनाद्यान्तेविषुत्वाबधकुर्यादित्युक्ते
कुलपदं याद्यान्तेवषुविशेषलचिकित्सावस्याति अत्र यान्तेवपाठाव्याधवृत्तक संज
त पयकुलपदपायास्त्रचंदनवस्यनेनुपत गुह्यरोगचतत्सर्वेकार्यसान्तरवासिकं अत्र या
तेवमेप्यनाम्निपान्तेविस्त्रीरजसिजलंपिवेत किंभूतंपाठादेर्जात पाठाप्राचीनाव्याध
त्रिकटुकं वृत्तकःत्रुटिःवेवमित्यादि कुलपारव्यरजसिपृथ्यारव्यचापिचंदनंपयमत्रच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गात्रस्य कास्थ्यापनं मधुकपिप्पलीसिद्धं तैलमनुवासनमुक्तं रक्तपित्तेस्त्र वातजे श्यावर्तवे भा
र्गिभद्रदारुसिद्धं सर्पिः पानं काश्मर्यफलदुग्धसहाससिद्धं वा क्षीरं मधुकमृणालबिसालाकन्दंप
यः सर्पिः सह तैलं प्रियंगुतिलकल्कं वा योनौ धारयेत् सरलमुद्गपर्णीकषायः प्रक्षालनं पि
त्तजे काकोलीद्वयविदारीमूलकल्कायं मधुकपुष्पकाश्मर्यफलकाथं वा सशर्करं पिबेत्
श्वेतचंदनक्वाथं चेत्यादिकं संग्रहाद्बोध्यं इदानीं कुणपचिकित्सामाह कुणपेपुनः
धातकीपुष्पखदिरदाडिमार्जुनसाधितं काथयेत् सर्पिर्यथा वा विपक्वं मसृणादिभिः कु
णपाहृयेतुरेत सिद्धानुक्तादिद्रव्यसाधितं घृतं पाययेदित्येके इति शेषः सर्ववाम्सृणादि
भिः प्रसनादिगणोक्तद्रव्यैर्बीजैर्घृतं विपक्वं पाययेत् ननु कुणपइति सामान्योक्तावपि
कथं रेतसोऽति विशेष उपलभ्यते पूयरेतः प्रकरणादपि च कुणपास्वस्य पुरस्तादुपक्रमं व
क्ष्यति यथ कुणपपूयास्वइति तस्मादेतत्सर्वे हृन्नहणपुक्तं पुनर्ग्रहणं मसृणादि
दुष्टरेतो योन्याक्रान्तं क्रियां न कुर्यादिति नित्यानयति सांप्रतं ग्रन्थिसंज्ञरेतसमुपक्रमं ब्रूते पला
शभस्मास्मभिदा ग्रन्थ्याभे पूयरेतसि पलाशस्य भस्मपलाशभस्मा [illegible] तभित्
पाषाणभेदः पलाशस्य चाश्मभिच्चैतेन विपक्वं घृतं ग्रंथ्याभे ग्रंथिनाम्नि रेतसि पा
ययेत् पूयेत्यादि पूयाख्ये रेतसि परूषकवटादिभिः विपक्वं घृतं पाययेत् परूषकस्य वट

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेनेदं द्योत्यते कषायः प्रयोजितो वश्यमेव विषमज्वरं कुरुते अरुच्यादीन पुनर्नावश्यं कुरुत इत्यर्थः

प्र॰चि॰ तदेवं कषायो रसविशेषो मलत्त्वाद्देवनवज्वरे निषिध्यते ननु कल्पनावशात् तथा मुनिः यः कषायः कषा

९ यस्तु स वर्ज्यस्तरुणे ज्वरे ननु कल्पनमुद्दिश्य कषायः प्रतिषिध्यत इति आ सप्ताहादौषधं केचिदाहुरन्ये द

शाहतः केचिल्लघ्वन्नभुक्तस्यौषधं योज्यमामोल्वणेन तु सप्ताहादनंतरमष्टमाहादौषधं ज्वरघ्नं यथायोग्यं स्ता

दिकस्य न याकल्पितं योज्यमिति केचिदाचार्या आहुः अन्ये तु दशाहादूर्ध्वमौषधं मुस्तापर्पटकादिकं योज्यमाहुः

केचिदाचार्या लघ्वन्नभुक्तस्य नरस्यौषधं योज्यमित्याहुः लघ्वन्नशब्देनात्र पथ्यादिकं मन्यते उदन्तस्य लघु

त्वोक्तेः लघ्वन्नं भुक्तं येनासौ लघ्वन्नभुक्तः आहिताग्न्यादित्वान्निष्ठांतस्य परनिपातः परमतमप्रतिषिद्ध

मनुमतमेवेति सर्वमेतत् प्रमाणं प्रयोगार्हत्वात् आमोल्वणे तु न आमाधिके ज्वरे लिङ्गरूपे पुनरौष

धं ज्वरघ्नं मुस्तापर्पटकादिकं षडहादूर्ध्वं सप्ताहाद्दशाहाद्वा न योज्यं किमिति चेदाह। ह। तीव्रज्वरपरीतस्य दो

षवेगोदये यतः दोषेष्वनिवृत्तेषु तद्धास्तैमित्यकारि अथवामाने मेघ ज्यं भयोज्वलयति ज्वरं तीव्रज्व

रेण परीतस्य ज्वरिणः पुंसो दोषवेगोदये दोषस्यामाद्यारम्भस्योल्वणस्य वातादेर्दोषस्य वेगो [illegible] मुस्तापर्पट

कादिनो क्लेशाद्दोषवेगस्तस्योदयः प्रादुर्भावो दोषवेगोदयः अथवोल्वणस्य वातादेर्दोषस्य वेगोदयस्त

स्मिन्दोषवेगोदये सति अथवा तथैव दोषेष्वामारम्भेष्वतिनिवृत्ते अतिशयेनसंचयं प्राप्ते वातादौ वा

राम

९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पक्वतः कफे कटुकेयोज्यः इति जगाद ॥७॥ पित्तश्लेष्महरत्वेपि कषायस्तु न शस्यते नवज्वरे मलस्तंभात्कषायो
विषमज्वरं कुरुते हृल्लासहिध्माध्मानादिकानपि नव्यास्ते पच्यंते कषायस्तंभिता मलाः ॥ नियन्त्रिता विम
र्गाबाबद्धं यत्पित्तज्वरं वद्धुमकफवातत्वात्स्थूलानाहादिकानपि कषायः कषायरसाधिष्ठितद्रव्य
जः कषायः स पित्तश्लेष्महरत्वेपि नवज्वरे तरुणज्वरे न शस्यते कुत इत्याह मलेत्यादि कषायोऽत्र यो
जितो मलस्तंभात्कारणाद्विषमज्वरं सततकादिकं कुरुते कषायस्तंभिता हि मलाः क्रोशमप्राप्तिपन्नत्वात्स
म्यक्समयं तं तंधिस्रोतोलीनाः कषायपानविहतवेगाः प्रशमनत्वाद्विषममेव ज्वरं कुर्वंति यदि हि तेषां कषाय
दानेन शक्तिर्हानिर्न कृता स्यात् तदा संततमेव ज्वरं कुर्युः तस्मात्स्वल्पत्वात् सततादिकं विषमज्वरं कर्तुमेषां
युक्तं ननु पित्तश्लेष्महरत्वेपीत्यनर्थं यतः कषायः पित्तकफहेति एवमुक्तं अस्यैवैतत् अर्थविशेषज्ञापनार्थं तु
न रक्तं नवज्वरे एकदोषजे सन्निपातजे वातकफजे वातपित्तजे केवलं कषायो न शस्तो पितु पित्तश्लेष्मज्वरेपि न
शस्तः तस्मात् पित्तकफजे पि ज्वरे नायं योग्य इत्यर्थः तथा कषायो यो जितो न केवलं विषमज्वरं करोति यावद
न्यानपीस्त करोति अत्रापि मलस्तंभादिति संबध्यते तेन य ध्यादिशब्देनानिपतरूपाणामनेकानां व्याधीनां ग्र
हणं प्राप्तं तथापि मलस्तंभातयेव्याधयउत्पद्यंते अरुच्यादिरूपास्तेषामेवेदं ग्रहणमर्थमेवं संबंधः कृतः तथा वि
षमज्वरान्हृल्लासहिध्माध्मानादिकानपीत्येकविभक्त्यैव निर्देशः कर्तुमुचितं पृथङ्निर्देशो यः कृतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मुस्तापर्पटकादयः कषायाः यथायोगं योगानतिक्रमेण योग्याः कषाया यस्मिन् यस्मिन् ज्वरे दातुं युक्ताः सन्तु त्वयो
ग्र·टि· ज्याः इति यथायोगयोज्याः किंभूताः एते सुरित्याह दोषपाचनाः दोषस्यामाख्यस्य पक्वाशयस्य पाचनाः तंत्रांतरे चो
१० क्तं प्रयुक्तं पाचयेद्दामं यत्तत्पाचनमुच्यते पित्तादित्रिजन्मिनामस्य यस्मात्तच्छमनं मतमिति अत्र मुस्तापर्प
टस्य पूर्वमुपन्यासो ज्वरनाशने अन्योन्येभ्योस्य मुस्तापर्पटस्य प्राधान्यप्रदर्शनार्थः तथा वाचार्योऽन्यत्रोक्तं म
ध्ये मुस्तापर्पटकं ज्वर इति निर्दिशति तस्मान्मुस्तापर्पटस्यैव ज्वरनाशने ज्यायस्त्वमित्यवेहि व्याधिप्रतिपक्ष
त्वात् ।७। कलिंगकाः पटोलस्य पत्रं कटुकरोहिणी पटोलसारिवा मुस्ताः पाठा कटुकरोहिणी पटोलनिं
ब त्रिफला मद्वीका मुस्तवत्सकाः किराततिक्तममृता चंदनं विश्वभेषजं धात्री मुस्ता मृता क्षौद्र मद्वीका
क समापनाः पंचैते संततादीनां पंचानां शमना मताः ।।८।। कलिंगकादयो द्राक्षांकैः समापने येषां ते
द्राक्षांकसमापनाः पंचैते पंचानां संततादीनां यथासंख्यं शमना मता मुनीनामिति शेषः दुरालभामृता
मुस्तनागरं वातजे ज्वरे अथवापि प्पल्यादिकं वातजे ज्वरे कनीयो वृहत्यादिकं पंचमूलं च वातजे ज्वर इति
योज्यं ।९। पित्ते शक्रयवा यने कटुकाचेति सक्षौद्रं मुस्तापर्पटकं तथा सधन्वयासमूनिंब पित्ते पित्त
ज्वरे शक्रयवादयः समाक्षीका मताः पित्तजेपि मुस्तापर्पटकं धन्वयासकिराततिक्तकाभ्यां सहितं हितं ।१०।
वत्सकाद्यो गणः कफे अथवा वृषगो गुडूची शृंगवेर दुरालभा वत्सक मूर्वाभार्गीत्यादिः कफमतः अथ
वारग्वधादिः गंगोधी मुस्ता ।११। आरग्वधं धालक्ष्म्या प्रोक्तो दीपनपाचनं अथवापि षली मूलं शम्याक कटु

अथवापिप्पलीमूलगुडूचीविश्वभेषजं कनीयः पंचमूलं तु ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दोषउल्लेखनएवसंज्ञास्तैमित्यमावश्यंकरोतितस्मिंसंज्ञास्तैमित्यकारिणि यतोयस्मात्तदानीमामच्छन्न
तयापावकेनापच्यमानंभेषजमौषधंमुस्तापर्पटकादिशृतादिकल्पनाकल्पितंतदौषधंप्रयुक्तं भूयःपुन
रपिज्वरंज्वलयत्युत्तेजयतिनशमयति तस्माद्यामोल्वणेज्वरेनषडङ्गाद्वैनापिसन्नाहान्नवदोषाङ्गाद्वैभेष
जंयोज्यमित्याह ॥ मृदुज्वरोलघुर्देहश्चलिताश्चमलायदा अचिरज्वरितस्यापिभेषजंयोजयेत्तदा मृदुज्वरे
उपद्रवमृदुतयालघुपटुर्देहः चलितामलामूत्रपुरीषादयः मृदुज्वरेत्यादिलक्षणामवस्थायदाभवति तदत्र
स्यावस्थायामचिरज्वरितस्यापिअनतिक्रान्तषडहस्यापिभेषजंयोज्यं अपिशब्दात्किंपुनःषडहेतीतेज्वरि
तस्यैवंलक्षणामवस्थामुत्पन्नायांतदौषधंवायोज्यमित्येवंव्याख्याध्यवस्थाकालातीतोपिगरीयसीत्युक्तं
भवति अथतदौषधमाह ॥ मुस्तयापर्पटंयुक्तंशुण्ठ्यादुःस्पर्शयापिवा पाकंशीतकषायंवापाठोशीरंसवा
लकं ॥ पिबेत्तद्वच्चभूनिंबगुडूचीमुस्तनागरं मुस्तयासहपर्पटंयुक्तमथवाशुण्ठ्याधन्वयासेनयुक्तंपाकंशीते
शीतकषायंशीतकल्पनाकल्पितंवाकृत्वापिबेदितिवक्ष्यमाणेनसंबंधः पाठाचउशीरंपाठोशीरंबाल
लकेनसहशृतंशीतंवापिबेत् स्वरसकल्कफाण्टाख्यकल्पनाभ्यः शृतशीतकल्पनाद्वयकल्पितस्या
स्यतथासामर्थ्यस्यदृष्टत्वादेतत्कल्पनायुगलमुपन्यस्तवान् चसमुच्चयेभिन्नक्रमः तद्वदित्याह
नकेवलंमुस्तापर्पटंपिबेत् तथापाठोशीरंसवालकंपिबेत्तद्वद् निंबगुडूचीमुस्तनागरमपिपिबेदि
ति ॥ यथायोगमिमेयोज्याः कषायादोषपाचनाः ज्वरारोचकतृष्णास्यवैरस्यापक्तिनाशनाः ॥ इमेपूर्वोक्ता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

21

क्वाद्यः कफपित्तज्वरघ्नंति ।७॥ सन्निपातज्वरे व्याघ्रीदेवदारुनिशाघनं पटोलपत्रनिंबत्वकत्रिफलाक
.शा.टि. टुकायुतं सन्निपातज्वरे व्याघ्र्यादिकुर्कातं पाचनं ।७॥ नागरं पौष्करं मूलं गुडूचीकंटकारिका सकासश्वास
११ पार्श्वार्त्तेवातश्लेष्मोत्तरे ज्वरे नागरादि पाचनं वातश्लेष्माधिके ज्वरे कासादीन्निहंति ।७॥ मधूकपुष्पम
द्वीकात्रायमाणापरूषकं सोशीरंतिक्तात्रिफलाकाश्मर्यं वाल्पयेद्धिमां कषायं तं पिबेत्कालेज्वरा सर्वानुप
पोहंति मधूकपुष्पादिकं कालेशास्त्रोक्ते शीतकषायं पिबतज्वरान् सर्वानेकदोषद्विदोषत्रिदोषजानपो
हंति उपसर्गादस्यत्यूह्योर्वावचनमिति परस्मैपदं ।७॥ जात्यामलकमुस्तानि तद्वद्धन्वयवासकं बद्ध्वावटक
टुकाद्रात्रौ पीतं त्रिफलाद्युज्वरान् जातिपत्रवामामलकानिमुस्तधन्वयासकं तद्वत्सर्ववद्धितकषायं कल्य
पिब्बापिबेत्सर्वान्ज्वरान्हंति धन्वयासकं चेति वाशब्दो लघुत्वाद्दुष्टव्यः तदेतैस्तु भिर्द्रव्यैरेतत्पाचनं के
चित्तु धन्वयासकं पठयोऽवलंबंति तस्मादेतत्कृतापि कषायः पंचवद्द्योध्यः तथा वदुर्गविदे पुरुषः कट्फलादि
कं कषायं पिबेदिति वदंते ननु द्विसमिति शीतस्यमलस्तंभहेतुत्वात् ग्रस्य वोषधस्य शोधनरूपत्वात् गुडा
सुधागुडइत्यन्ये ।७॥ जीर्णौषधो नैव पेयाद्यमाचरेत् श्लेष्मवान्नतु पेयाकफवर्द्धयति पंकं पांशुषु वृष्टिवत् जी
र्णं परिणतमौषधं यस्य स जीर्णौषधः सन् पेयाद्यमेव पूर्वोक्तमन्नं भुंजीत अयुतइत्यन्नमिति कृत्वा पेया
देरप्यन्नत्वं श्रेष्ठिशब्देन पूर्वादिग्रहः न च सर्वैः कश्चित्पेयादिकमाचरेदित्याह श्लेष्मवान्नतु जीर्णौषधोपि
श्लेष्मवान्नरः पेयादिकं नाश्नीयात् किमित्याह पेपेत्यादि यतः पेयाकफं वर्द्धयति विलीनरूपस्य कफस्य स्या

राम
११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काथनं दशिवंबधादियुक्तं ज्वरे रक्तभ्रमादिघनावसाने दीपनपाचनं ॥ ७ ॥ द्राक्षामधूकमधुकं लोध्रकाश्मर्यसारि
वा मुस्तामलकह्रीबेरपद्मकेसरपद्मकं मृणालचंदनोशीरनीलोत्पलपरूषकं फांटो हिमो वा द्राक्षादिर्जाती
कुसुमवासितः युक्तो मधुसितालाजैर्जयत्यनिलपित्तजं ज्वरं मदात्ययं छर्दिमूर्छां दाहं श्रमं भ्रमं उर्द्धगं रक्तपित्तं
च पिपासां कामलामपि द्राक्षादिरयं गणः पांडुःसद्यो मिथुन श्रृतस्त्येव लक्षणः तथाहि माशीतो वा रात्रिं द्वे
स्थितस्त्येव लक्षणस्तथाजातीकुसुमैः सुगंधीकृतः मधुसितालाजैर्युक्तो वातपित्तजं ज्वरं जयति मदात्ययादी
श्च ॥ ७ ॥ पाचयेत्कटुकीपिष्टां कर्षे रमितनीरे सुचा निष्पीडितो घृतयुतस्तद्रसो ज्वरदाहजित् कटुकांपानी
येन पिष्टां कर्षपरिमितं द्रवं रसं षट्प्रमितं तत्पाम्यचौ पाचयेत् तस्यारसो निःपीडितः सर्पिर्युक्तो ज्वरदोन जयति ॥ ७ ॥ क
फवाते च वातिक्तं पाठारग्वधवत्सकाः पिप्पलीचूर्णयुक्तो वा क्वाथः छिन्नोद्भवोद्भवः वातश्लेष्मणि वा
दयो मताः अथवा गुडूचीसंभवः क्वाथः पिप्पलीचूर्णयुतो मतः ॥ ७ ॥ व्याघ्रीमुस्तमस्ताक्वाथः पिप्पलीचूर्ण
संयुतः वातश्लेष्मज्वरश्वासकासपीनसशूलजित् व्याघ्रादिक्वाथः कणाचूर्णसंयुक्तो वातश्लेष्मज्वरादि
न् ॥ ७ ॥ पथ्याकुस्तुंबरीमुस्तशुंठीकट्फलपर्पटं सकट्फलं वचामार्गीदेवाह्वं मधुहिंगुमत् कफवातज्वरे श्वे
कुक्षिहृत्पार्श्ववेदना कंठामयास्यश्वयथुकासश्वासान्नियच्छति पथ्यादिपाचनं सिद्धचूर्णमधुहिंगुभ्यां
द्विशाणमात्राभ्यां संयुतं कफवातज्वरश्वासादीन्पराकरोति ॥ ७ ॥ आरग्वधादिसक्षौद्रः कफपित्तज्वरं जयेत् त
थातिक्तारक्षोशीरत्रायंतीत्रिफलामृताः आरग्वधेद्रव्यवादिर्माक्षिकसहितः कफपित्तज्वरं जयति तथाति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

23

रद्दात्तयत्नभर्जनकादिरहितान् तथातिक्रमयुक्तान् तद्दशाविरूपसमं गन्धवर्णस्पर्शयुक्तान्वाच्चेत् संयाह्लाद
करान् तथा रुचिकरान् ज्वरिणां स्वस्थस्य वा रोचिष्णून् तथा पटून्सलवणान् ।७। रक्ताद्याः शालयो जीर्णाः षष्टिकाश्च ज्व
ज्व·चि· रहिताः रक्ताद्याः रक्तो महान् सकलमस्त्यादयः तथा षष्टिका व्रीह्यादयश्चापि जीर्णाः पुराणा हिताय पथ्याः ।८। श्लेष्मो
१२ ज्वरे वीततुषास्तथा वाट्यकृता यवाः श्लेष्मोत्तरेरवभस्त्रेष्माणि ज्वरे वीततुषा अपनीतत्वचो यवास्तु पथ्याः कीदृ
शा वाट्यीकृताः भृष्टविदलीकृता इत्यर्थः ।९। उदनस्तैः शृतो हिङ्गिः प्रयोक्तव्यो यथायथं दोषदूष्यादिबलतो ज्वर
घ्नक्वाथसाधितः उदनस्तै रक्तशाल्यादिभिः पूर्वोक्तैः शृतः कृतो ज्वरिणां पथ्यायथं यो यस्मात्तदानोचितः स तस्य प्रयोक्त
व्यः किंभूतः हिङ्गिः स्रुतो हिङ्गुवारो ग्रीनुवारान्जलं दधाधौतश्रुतः कथं प्रयोज्यः दोषदूष्यादिबलेन ज्वरघ्नैर्ज्व
रापहैर्द्रव्यैः क्वाथं कृत्वा तेन क्वाथेन साधितो दोषस्य वातादेर्बलं तथा दूष्यस्य रसादेर्बलमपेक्ष्य स्यादिग्रहणादे
शकालवयः सत्वसात्म्यशरीराहारबलं गृह्यते एकाहादिकानां ज्वरिणां मकृतयथानामेव कुलत्थमुद्गचणका
दिभिर्यूषानुक्त्वा सप्रतिसामान्येन ज्वरिणां कृतपथ्यानां यूषादीनाह ।१०। मुद्गाद्यैर्लघुभिर्यूषाः कुलत्थैश्च ज्वराप
ल१ हः मुद्गाद्यैः शिम्बिधान्यैर्लघुभिः कृता यूषास्तथा कुलत्थैः कृता यूषा ज्वरघ्नाः मुद्गाद्यैरित्यादिः प्रकारे तेन मुजरा
मकुष्ठमसूरादयो गृह्यन्ते मुद्गशब्दस्यादौ निर्देशः श्रेष्ठत्वं बोधयति एष साध्यव्याधौ यादृल्येन मुद्गयूषः कार्यमुद्गा
नोपपन्नत्वात् तथा चोवाच मुनिः मुद्गाद्याः शिम्बिधान्यानां पथ्यत्वे श्रेष्ठतमा इति ननु मुद्गाद्यैरित्यादिशब्देने
वकुलत्थाग्रहीता एव किं पृथङ्निर्देशः न वक्ष्यमाणे कुलत्थ एवं गुणाः ।११। कुलत्थाः पाकेऽम्लाः शुक्राश्चमभ्या

राम
१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नभावतामुत्पादयति संस्थानविशेषमुपर्युपरिभावं यतो यदा यमुत्पादयति ननुसाककफं सान्द्राद्वर्द्धयतीतिव
र्द्धयतेरर्थो नेकार्थत्वाद्धातूनामिति एवं वा यो नु तंत्रकारदर्शनाद्वगम्यते तथाचाह पंकं पांसुवृष्टिवदि
ति यथा पांसुवृष्टिः पतति ननु पंकं वर्द्धयतीति शिथिलरूपतां प्रांसुना मयास्य निबिडरूपतामिति षामुत्पा
दयति न पांसुन्नवृष्टिर्वर्द्धयत्याधिक्यं नयति न वर्द्धयतेरत्रार्थः तंत्रकारस्यापि एवं विवक्षितो भविष्यत्
तदानीमत्रैवं स्पष्टमेव दृष्टांतमदर्शयिष्यत् तथा च पाकः पंकं वर्द्धयति यथा वृष्टिर्नदीजलमिति तच्चतंत्रका
रो मुनेर्वानुसारेणाह । श्लेष्माभिष्यन्नदेहानामतः प्रागपि योजयेत् यूषान् कुलत्थचणककलायादि
कृतान्लघून् रूक्षोष्णान्तिक्तरसोपेतान्हृद्यान्रुचिकरान्पटून् अभिष्यन्न इति अभिपूर्वात्स्यंदेः स्रव
णार्थो व्युत्पादितः श्लेष्मणा स्तुतिरूपेणाभिष्यण्णः क्लिन्नरवदेहो येषां ते श्लेष्माभिष्यण्णदेहास्तेषामतो
ज्वरेण प्रागपि प्रथमपथ्यावसरेपि यूषान् योजयेत् किंभूताच्छ्लेष्मवतः पुंसो जीर्णौषधस्य यूषान्यो
जयेदित्यपि शब्दस्यार्थः किंभूतान् कुलत्थादिकृतान् तथा लघून् ननु कुलत्थादीनां लघुत्वात्तत्कृता
यूषा लघव एव भविष्यन्ति तत्किं लघूनित्यनेन अत्रोच्यते शिंबिधान्यानां मध्ये गुरवोपि राजमाषमा
षादयः संति तन्निरासार्थमेतत् अत्रोच्यते अपि च लघूनित्यनेन यूषप्रकृतिद्रव्यैरल्पपरिमाणैः कृ
तानिति द्योतयति यतोल्पपरिमाणैः कुलत्थादिभिः कृता लघुतराः स्युः तस्माल्लघूनिति युक्तं तथा

25

क्षी

पथ्यं अप्यवदरंति तन्निषेधा येन तदुक्तं एवंविधानि रुचं जनानि तेमनानि रसक षायाएयोदनेन सहाप्यवह्नेयानि ॥८॥
अनुपाने पि योजयेत् तानि क्वथित शीतं च वारि मद्यं च सात्म्यतः अनुपानेप्यनुवप्य पश्चात् पाने पि योजयेत्
१३ तथा क्वथित शीत शीतं च वारि मद्यं च सात्म्यतः सात्म्यवशादनुपाने पि योजयेत् ॥९॥ सज्वरं ज्वरमुक्तं वा दिनां
ते भोजयेल्लघु श्लेष्मक्षयविवृद्धोष्मा बलवाननलस्तदा सज्वरं नरं दिनांते भोजयेदथवा ज्वरमुक्तमचिरका २
लज्वरमुक्तं किंभूतं भोजनं भोजयेत् तदा तस्मिन् दिनांतास्यकाले श्लेष्मक्षयविवृद्ध उष्मा सभावोऽस्या
नलस्य जाठरानलस्य श्लेष्मक्षयविवृद्धोष्मा अनलः अत एव च बलवान् तदुक्तं वयमुक्तं शाक्तः ॥१०॥ यथोचितेऽथवा
काले देशसात्म्यानुरोधतः प्राणाल्पवह्निर्भुंजानो न ह्यजीर्णे न पीड्यते अथवा यथोचिते काले प्रायः लघु
पथ्यं भोजयेत् कथं भोजयेदित्याह देशेत्यादि देशसात्म्यवशात् तं भोजयेन्नैवमेव नन्वेवं सति यस्य पूर्वाह्नका
ले भोजनमुचितं तदा तस्य भोजने दीयमाने को गुणः स्यादित्याह प्राणेत्यादि नन्वेवं सति यस्य पूर्वाह्नकाले
भोजनमुचितं तदा तस्य भोजने दीयमाने को गुणः स्यादित्याह प्राणेत्यादि यस्मादल्पवह्निर्मंदाग्निः पूर्वाह्ने भुं
जानः अजीर्णे न पीड्यते न बाध्यते अधुना सर्पिःपानकालं निरूपयति ॥११॥ कषायपानपथ्यान्नैर्दशाह इति लंघिते
सर्पिर्दद्यात् कफे मंदे वातपित्तोत्तरे ज्वरे पक्वेषु दोषेष्वमृतं तद्विषोपममन्यथा दशाहे स्यादतीतेऽपि ज्वरोपद्रव
वृद्धकृत् लंघनादिक्रमं तत्र कुर्यादाकफसंक्षयात् काषायस्य मुस्तापर्पटकादेः पानं कषायपानं तेन नितराप
थ्यान्नैः पेयायूषादिभिर्दशाहे इत्यनेन प्रकारेण लंघिते निक्रांते तदेति प्रायेणाल्पीणः कफः संभाव्यते अतो

सज्वरं ज्वरमुक्तं वा भोजयेत् यथापथ्य उचितः सात्म्य आहारकालस्मिन् भोजयेन्नयथोचितेदिकाले ८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सपीनसान् कासार्शः कफवातांश्च पूर्वेति पिन्नास्तदः पां इत्येवमुक्तत्वाद् स्लविपाकित्वादत्तिपिन्नास्तकारित्वानकु
लत्थानां यूषो बहुद्रव्यपरिमाणेबहुमात्रो यवगुरुश्च ज्वरस्यानशांतये संपद्यते प्रत्युत रक्तये स्यादिति संभाव्यते पि
त्ते विरुद्धत्वात् तस्माद् अल्पपरिमाणद्रव्यसाधिताल्पमात्रया कुलत्थयूषः श्लेष्माद्युपशमकृत् तथा यवन्मात्रः
स्यान्नावानेव प्रयोज्यतर इति स्थितं। कारवेल्लककर्कोटबालमूलकपर्पटैः वार्ताकु निंबकुसुमपटोल
फलपल्लवैः अत्यंतलघुभिर्मांसैर्जांगलैश्च हिता रसाः व्याघ्रीपरुषककोलीगुडूचीआमलकदाडिमैः संस्कृताः पिप्पली
शुंठीधान्यजीरकसैंधवैः कारवेल्लकादिका भीरसा ज्वरे हिताः मुनिस्तु कारवेल्लकादीनां शाकत्वमेवेच्छति स्वार
णेदप्युक्तं पटोलं सफलं निंबं कर्कोटं कटुकल्लकं शाकं पर्पटकं चैव स्यादिति तथा जांगलैर्जांगलदेशप्राणिजै
स्तदभावात्तुल्यैरन्यदेशप्राणिजैरपि मांसैर्हिता रसाः व्याघ्र्यादिभिः संस्कृताः तथा पिप्पल्यादिभिः संयुता इति
वक्ष्यमाणेन संबंधः संस्कारमात्रयोगमा नः पिप्पल्यादयो त्रयो ज्यास्त्यर्थः। सितामधुभ्यां प्रायेण संयुता
वाम्लता कृताः प्रायेण केचिदेव सितामधुभ्यां युता अवस्थावशान्न सर्वे एवं विधा भूता रसा यूषाश्चैवं विधाः कार्याः
कृताकृताः दाडिमामलाजिरशुंठ्यादैरपि संस्कृता यूषा रसाश्च कृता विपरीता स्त्वकृता। अन्नकाले तक्रसिद्धानि
रक्तानि भंजनानि च अच्छान्यनलसंपन्नानि अनम्लेन तक्रेण सिद्धानि तथा रक्तान मध्यवह्नहंतुमभिलाषितानि त
थाच्छानि तनूनि न घनानि तथा अनलसंपन्नानि वह्निपक्वानि हितकृत्सम्यक्पक्वमेवाच्छीकृत्य च शुंठीजीरकादिना

केचि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संस्कारमनुरुध्यते सुतरां न दुग्धादिदृष्टा यथा स्वौषधसाधितं यस्माद्धृतं सर्वेषां वातपित्तजितामग्र्यं ८

प्र.द्वि. सदागतिः तस्य संशमने सर्पिर्दीप्तस्येवांबुवेश्मनः तद्वदेव तेजसस्तज्ज्वरकृत्स्व इति वचनादेहोष्माजात्वरो
न लोमकूपेतन स्येवज्वरकृतत्वात् तथोक्तं मलास्तत्र स्वैः स्वैर्दुष्टा इत्यादि यावत्ज्वरं निर्वर्त्तयंति इत्यादि जाठ
१४ रानलस्येवज्वरकृतत्वे तेन ज्वरकृता तेजसा तेजसानूहितस्यचतुम्यः सर्पिः संशमने च शब्दाद्वान्यस्यापिग्र
तएवाह वमनेत्यादि वमनादिभिरौष्म्यलाङ्घिः कृतेस्तदानीयः स्याद्भवेदग्निवलः प्रवृद्धत्वाद्धिममर्थाधा
न५ तुः कोधातुः सहचारी यः सहचरतीत्युक्तोवाताख्यो धातुरग्निना सह चरति नन्वेवं परस्परसहचरभावव
२८ ग्निरपि वायुना सहचरंति ततोग्निस्वभावत्वात्पित्ताख्योपि धातुरिह सहचारी प्राप्नुत्तान्निवृत्त्यर्थं सदागतिरि
त्याह सदागतित्वेवायोरेवात्यर्थत्वेनोपपद्यते इति पित्तस्याग्रहणं किं कस्य यथा संशमनं गृहंबुवेश्मनोः
गृहस्य दीप्तस्य ज्वलितस्य जलं यथा।टी। वातपित्तजितामग्र्यं यथानतयाःप्रन्यान्यौषधानि वातपित्त
जित एवतए वसायाम्मध्यात् सर्पिर्दद्यात् ज्वरे मंदे वातपित्तोत्तरे ज्वर इत्यादि यस्माच्च स्मृतं संस्कारमनुरुध्य
ते अनुवर्त्तते गुणान्तराधानं संस्कारस्तं च यस्मात् घृतं मुहूर्तिशयवैलक्षण्याद्नुरुध्यते आत्मसात्करोति
तैलादिस्तमेव ग्रमुमेव वन्यापमंगीकृत्य मुनिरेवोच्चते नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्त्तते यथा सर्पि
रतः सर्पिः सर्वस्नेहोत्तमं मतामिति हि यस्मात् सुतरां संस्कारमनुरुध्यते घृतं तस्मात् घृतं जीर्णज्वरातांर्त्तेरेज्वरेनि
र्विकल्पं दद्यात् कीदृशं यथास्वौषधसाधितं यथायथं व्याधिप्रतिपक्षैरौषधैःपक्वं।टी। विपरीतं ज्वरोष्मा

इति स्नेहः संस्कारमनुवर्त्तते न तु यथा घृतं संशेत्यमनहेदेव संस्कारमनुवर्त्तते इत्येव च स्नेहविशेषप्रतिपादि १ राम १४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दशाहे लंघिते इत्युक्तं आमज्वरसंज्ञानिवृत्तिमुपदर्शयितुं सप्तमे ह्यष्टमे वाह्नि निज्वरस्य जायते तथा च मुनिः स
सप्ताहेन हि पच्यंते सप्तधातुगता मलाः निरामश्चाप्यतः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनीति तस्मात् कषायपानप
थ्यान्नैरिति दशाहे लंघिते कफे मंदे जीर्णे प्राये सर्पिर्दद्यात् किंभूते ज्वरे वातपित्तोत्तरे वातपित्ताधिके अ
स्यामवस्थायां पक्वेषु निरामेषु वातादिदोषेषु सर्पिर्दद्यात् पक्वेषु सर्पिर्दत्तममृतं महागुणमित्यर्थः अन्य
था पुनरपक्वेषु दोषेषु कफोत्तरे तत्सर्पिर्दत्तं विषामयं विषतुल्यं दशाहेति क्रांतेविस्यात् अतोऽस्यामवस्था
यां सर्पिर्दत्तं ज्वरस्य तदुपद्रवाणां च वृद्धिं करोति तस्माद् अस्यामवस्थायां सर्पिःपानमयुक्तं तत्र कफोत्तरे स
ति लंघनादिक्रमं कुर्यात् कियंतं कालं आ कफसंक्षयात् यावत् कफस्य ज्वरकारिणोऽधिकस्य संक्षयः सम्य
क्क्षयो न तु धातुक्षयो विधायकः ततः कफज्वरेपि विडंगादि सर्पिर्वक्ष्यति । गा देहधात्वबलत्वाच्च ज्वरो जीर्णो
नुवर्त्तते जीर्णः पुराणो ज्वरोऽनुवर्त्तते नुबध्नाति कुतः देहधात्वबलत्वात् देहधातवस्तदारंभकारसरुधि
रादयो देहग्रहणाद्धातवः तेषां श्लेष्मणोपि धारणाद्धातव उच्यंते देहधातूनामबलत्वं तस्माच्च जीर्णो ज्वरोऽनुब
ध्नाति न स्वभावमात्राद्देवेति चशब्दस्यार्थः जीर्णज्वरस्य शांत्यर्थं देहबलाधानार्थं च सर्पिःपानं हितमिति दशे
यत्नाहाराबाहूदं कृते जे ज्वरलक्ते तस्मात्पूरितस्य च वमनस्वेदकाथाम्बुकषायलघुभोजनैः यःस्यादेति बलोधातुः सहचारी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स घृतेज्वरकासहः ॥ त्रिफलादीनि समस्तदलानि चैषकाथो घृतेन सह पेयाजितो ज्वरकासह ।
नामलकीभिः बिल्वमुस्तादि मपालनिस ।
स्यात् ॥२४॥ पिप्पलीद्वयवथाविति क्वाथा सिवामलका विषमं हलीमकं ॥ खरुचिमरा
वैद्दातयाति विषयाम्स्थिरयाच ॥ घृतमाशुनिहंति साधितं ज्वरमग्निं
तापमेह यावेमथु पार्श्वशिरो रुजेदवं ॥ पिप्पलादिभिः साधितं घृतमाशु ज्वरं हंति विषमा मन्यादींस्त्र
२५ बा ॥ तैल्वकं पवनजन्मनि ज्वरे पाजयेवृवनयाविधा जितं ॥ तैल्वकं घृतं वातव्याधि चिकि सिता कं त्र
वृनयारहिते पिबेत् ॥ २०॥ तिक्तकं कं रघ घृतं व पैत्तिके यच्च पालनिकया मृतं हवि ॥ २१॥ पैत्तिके ज्वरे
तिक्तकं कुष्ठ चिकित्सिता कं तथा वृष घृतं रक्तपित्त चिकित्सितोक्तमेत्रैववावसमाणेयोजयेत् ॥
पालिनिकया त्रायंत्यायन घृतेन पक्कं । तच्च पित्तज्वरं जयेत् ॥२२॥ विडंगसेव वेलचम्पाठामाबा ज्वर २५
त्रिनिसिंधु द्रवपाव श्लैके ॥२३॥ पलाशके क्षीरसमं घृतस्य प्रस्थं पचेत्तु लीलकपंप्पिविडंगादिभिः
पलप्रमाणेः घृतप्रस्थं क्षीरतुल्यं चतुर्गुणं ॥ जलं पचेत् । तच्चोपयुक्तं जीर्णायः कफज्वरं हंति ॥
२४॥ गडूच्यारसकल्काभ्यां त्रिपलाया वृषस्य च ॥ मृद्वीकायाबलायाश्च स्नेहाः सिद्धाज्वर छिदः ॥
गुडूच्यादीनां पंचानां पथक रसकल्काभ्यां सिद्धाः पंचस्नेहा ज्वरछिदो जीर्णज्वरघ्नाः स्युरित्यर्थः ।
२५ बा जीर्णेघृतेन च भुंजीत मृदुमांसरसौदनं । बलं ह्यलं दोषहरं परं तच्च बलप्रदं । घृतेनचपरिणतेन स

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णं जयेत्पित्तं च शैत्यतः स्नेहाद्वातं घृतं तुल्यं योगसंस्कारतः कफं। घृतं विपरीतं ज्वरोष्माणं ज-
येत्। ज्वरनिवर्त्तक उष्मजाठरानलो रूक्षतीक्ष्णादिगुणः संपन्नः स्यात् निरस्तो ज्वरनिवर्त्तको घृतं तस्य
स्निग्धशीतत्वादिगुणयोगाद्विपरीत। एवं विपरीतं ज्वरोष्माणं घृतं जयेत्॥ पित्तं च शैत्यतः। शैत्या
द्घृतं जयेत्। न स्नेहात्पित्तं स्नेहमिति वचनात्। स्नेहात् स्निग्धत्वात् घृतं वातं जयेत्। कफं स्नि-
ग्धशीतत्वादिना तुल्यं योगसंस्काराभ्यां जयेत्। योगो युक्तिः कफज्वरहरैर्द्रव्यैः सह योजना। संस्कारो
गुणाधानं। योगश्च संस्कारश्च योगसंस्कारौ। तथा च वक्ष्यति। स्नेहमेव परं विद्यात् दुर्बलानलदीप
नं॥ नालं स्नेहसमिद्धस्य शमायान्नं सुगुर्वपीति अत्रावक्तव्ये घृतं स्नेहनत्वं दीपनत्वाभ्यां वातशम
नं कुर्वन् ज्वरोष्माणं देहपत्वंश्चानस्य विनिवार्य ज्वरोष्माणमपि रोधयति दाहादि पुनस्य घृतं विपरीतगुणत्वाच्छ
म५ मं करोतीति न वह्निं। ननु यथा स्नेहाद्वातं रोधयति। तथा तत एव स्नेहात् किं नेति घृतं समानगुणत्वात्पित्तं
५४ शमयतीति भ्रमः। जीर्णज्वरो लघ्वन्नादिभिरतिरूक्षो ज्वरोष्मणा पित्तं रूक्षतमेव संपन्नं। स्नेहभागपरित्यक्ता
त्संस्कृत। मतः कथं रूक्षत्वाच्चयत्। न च घृते पित्तमेव शमयति न वातं कोपयति सम्यक्प्रभावत्वात् स्नेहन-
त्वाच्च। ०॥ पूर्वं कषायपाः सघृताः सर्वे योगा यथायथामलं॥ पूर्वं कषायाः प्रागुक्तानि पाचनानि सह घृतेन प्रयु-
ज्याः। कथं यथायथामलं दोषानतिक्रमेण॥ ०॥ त्रिफलां पिचुमर्दत्वचं मधुकं बृहतीद्वयं॥ समसूरदलं क्वाथः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमं पसंसेवं मेऽप्रच्यमेद त्वाऽन्नं नरं पेयाविलेप्याद्योयवाक्रमेदपाकृत्तवमनविरेचनानि
१६ नरंपः येयाद्यववारणाक्रमः साम्ये सर्वो मूर्च्छने । [illegible]मानं ज्वरोत्क्लिष्टमुपेतेन मलं सदा । पक्को
पिहि विकुर्वीत दोषः कोष्ठकृतास्पदाः । प्रतिप्रवर्त्तमानं वा पाचयन् संसर्ग्गेन येन । ज्वरेणातिक्लिष्ट
मुखे क्षीन ज्वरोत्क्लिष्टमलं पुरीषाख्यं च्यवमानं परं न मुपेतेन न हि धारणे प्रयत्नेन कुर्यात् पनतो
५५ षेनिमित्तं किमित्यसे न विधीयत इत्याह ।। पक्कोपीत्यादि । दोषः पुरीषाख्यो यतः पक्कोपि शाष्ट्र
किमुत्पापक्वः कोष्ठेऽऽमपक्वाशयाख्यकृतगृहीतमास्पदमवस्थितिर्येन स एवंभूतो विकुर्वीत वि काः६
रं कुर्यात् । प्रतिप्रवर्त्तमानं वा तं मलमपक्वं पाचयन् संसर्ग्गेन येन । नत्वाम एवं संग्रहीतव्य इत्याह
दोषा ।। आमसंग्रहणं दोषोपक्रमे ईरिताः आमशब्दः पुरीषाख्यस्य दोषस्य पच्यमानावस्थावलन
णार्थः आमस्यापक्वस्य संग्रहणं । तस्मिन्नामसंग्रहणे ये दोषा भवंति तैर्दोषोपक्रमणीयाध्याय दोषोपक्रमे६
ईरिता उक्ताः ।। तथा च तत्रोक्तं । उत्क्लिष्टान् अधऊर्द्धं वा न चामान् व[illegible]हतः स्वयं । धारयेद्दोषधैर्दोषा
न वि धृतास्ते हि दोषदा इति ।। तस्मादामसंग्रहणार्थमौषधं न देयं । तथा आमज्वरे ष्यामनिर्हरणार्थ
५३ मौषधं देयमिति । प्रतिपादयन्नाह । आपाययेद्दोषहरणं मो[illegible] हृदामज्वरेनृपः । प्रसृसंकमस्य
पिसंकरान्तेण परामर्षात् । प्रतिप्रत्यपायं पथ्येनैव सूक्तं नेत्रकला । नत्र च वाक्ये रूपकाख्यालंकारः ।
नस्याद्यव न लोजनं । तदपरामोपस्येस्मिन्तियस्मिन् स्पष्टादक्षयोर्योगः । अस्मादर्शनं । यः सेवेत कुनृप ६
एष सुतं तं कमेर्वंकर स्यान्नेनपरामर्षेण ॥

१६

32

तिम्रद्वतीहृत्यं मांसरसोद्यानेभुंजीत हि यस्मादल्पं बलं दोषहरं भवति । क्वचरसोनमतिशयेन बलकरं स्यात् ॥६॥
कफपित्तहरा मुद्गकारवेल्लादिजा रसाः । प्रायेणातस्मान्नहिताजीर्णो वातोत्तरे ज्वरे । स्थूलोदावर्तविड्बंधभजन
कफपित्तहरा मुद्गकारवेल्लादिरसाः कफपित्तहरा जीर्णे ज्वरे वातोत्तरे प्रायेण
नात्यरवहिता: प्रतनएवतस्मान्नाहरणास्मुद्गकारवेल्लादिरसाः ॥७॥ तथाप्येतद्वमपिचेतज्ज्वरः कुर्वीत शोधनं ल४
नहिता: तेह्यपयुक्तः स्थूलादिकृतात्यरवहिताश्रसु:
शोधनार्हस्यवमनं प्रागुक्तं तस्य योजयेत् । आमाशयगते दोषे बलिनः पाययन्बलं । एवमपि कृते
सतियदिज्वरो न शाम्यति । तद्दाशोधनार्हस्य नरस्य प्रागुक्तं पिप्पलीभिर्युतानालानिस्यादिकं
वमनं योजयेत् । दोषे आमाशयगते सति बलवतः पुंसो वमनं योजयेत् बलं पालयन् रक्षन् ॥८॥
पक्वेनु शिथिलदोषं ज्वरेवा विषमेहजे । मोदकं त्रिफलाश्यामात्रवृत्पिप्पलिकैः सरैः सखितामधु
भिर्दद्यात् दोषापचं वातेरचनं आरग्वधं वा पयसा मृद्वीकानां रसेनवा । पक्वे पुनर्दोषे तथा शिथिले
लेश्रविष्टस्रयवा विषजेमेद्यात्थवाज्वरेमोदकं त्रिफलादिभिविरेचनं दद्यात् ॥ श्रयवा पय ला२
सात्रीरेण मृद्वीकानां रसेनवा आरग्वधं ॥९॥ त्रिफलात्रायमाणां वा पयसा ज्वरितः पिवेत् । त्रिफ
त्रायं वा पयसा ज्वरी पिवेत् ॥१०॥ विरिक्तानां च संसर्गी मंडपूर्वा यथाक्रमं । विरिक्तानां ज्वरि
णां च शाश्वद्भूमितानां च यथाक्रमं क्रमानतिक्रमेण संसर्गी कर्त्तव्या स्यात् पर्धाहार्यमंडः पूर्वः

आषादांवा दोषविज्ञानकं मोदकि मिश्रामलके स्त्वन्सर्वैः समासहिताद्वोद्रेण गुटिका इत्तिकद्यात् ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्णशीतमुस्तंचेतिकल्काः॥अथवाधारोष्णमेवकालेहिमंअपतुंतीतयथाविषयंकालेप्रयोजयेत्॥अ
ग्र॰ तोन्यथानिरूपितानाक्षीरा पथ्यापिविषयादन्यथाअन्येनप्रकारेणप्रयुक्तंक्षीरंज्वरंहंति॥काष्टयः
वि समुत्थितंज्वरंसमं द्राक्षामर्कराघृतंश्वेतशीतमधुनेत् इत्याहज्वरनाशनं॥क्षीरंसुष्ठाद्युतंश्वेतमनंत
९८ रशीतमधुपुनंतद्वाहिजिह्वितपथ्यः॥ग्रानंद्राक्षापबलायष्टीसारिवाकणचंदनेः॥चहंतुदुग्धेनांभसा
वापिप्पल्यावाश्वेतंपिबेत्॥नाहृदितितेनपूर्वोक्तेनवपसातुल्यंतहमद्राया पूर्वोक्तश्वेतशीतंतत
उद्दाहज्वरहृननतथाद्राक्षादिति:श्वेतमनंतरंशीतंमधुपुतंतद्द्राक्षादिजिह्वितपथ्यः॥अथवास्तीरंचतुर्गुणे
नश्वेतंपिबेदथवापिप्पल्याश्वेतंपिबेत्॥कासा श्वासाशोथःमूलात्पार्श्वमूलाच्चिरज्वरात्॥मु
च्यतेज्वरितःपीत्वापंचमूलीसृतंपयः॥पंचमूलेनश्वेतंक्षीरंपीत्वाकासादिभ्योमुच्यते॥सुच्छनेरंतिक
मेकत्रैरितः॥चिरज्वरात्दीर्घकालानुबंधीज्वरः॥गास्तनमेरंडमूलेनवालबिल्वेनवाज्वरात्॥धारो
ष्णंयापयःपीत्वाविवद्धानिलवर्चसः॥सरक्तपिच्छानिस्रतेसनतृट्शूलप्रवाहिकात्॥एरंडमलेनवा
थवावालविल्वेनश्वेतमथवाधारोष्णंक्षीरंपीत्वापुरुषोज्वराद्विमुच्यते॥किंभूतात्ज्वरात्॥वि ॥किंसा॰
वद्धानिलवर्चसः॥विवद्धेविशेषेणवद्धेअसम्यक्प्रवर्तनेनादनिलवर्चसीयस्मिन्ज्वरेसतिबद्धा
निलवर्चास्तस्मात्तज्ज्वराद्विमुच्यते॥तथारक्तंचपिच्छाश्रावः॥ताभ्यामुपलक्षिताश्रुतिस्रुतिर

९८ नामावि
शेषमद

। किं कुरुते वपि रसस्य कर्षणं जायते स्यति। ७ ज्वरक्षीणस्य न हितं वमनं न च विरेचनं कामं तु पयसा तस्य निरू
हैर्वा हरेन्मलान् ज्वरेण क्षीणस्य पुंसो वमनं हितं न च विरेचनं न हितं। तर्हि कथं दोषनिर्हरणं तस्य स्या
त्। कामम् इत्यादि। तस्य कामं यथेष्टं कृत्वा पयसा निरूहैर्वा मलान् हरेत्। ८ क्षीणस्य चिरनस्य प्रक्षीणश्ले
ष्मणो दाहतृष्णतः। क्षीरं पित्तानिलार्तस्य पथ्यमप्यतिसारिणः। क्षीरमुक्तं तस्मात् सर्वपयस्तत स्य क्षीणस्य चिन
स्य नष्टप्रकर्षेण क्षीणः श्लेष्मा यस्य तस्य प्रक्षीणश्लेष्मणः तथा दाहश्च तृष्णा च ते विद्येते यस्य तस्य दाहतृ
ष्णतो न एव पित्तानिलाभ्यामार्तस्य पीडितस्य क्षीरं पथ्यमप्यतिसारिणः। किं पुनः प्रक्षीणः श्लेष्मा यस्य
तस्य क्षीणस्य चिरस्य पूर्वोक्तविशेषणविशिष्टस्य क्षीरं पथ्यमिति सपि शाखार्थः। ९ तद्वत् पूर्वं लंघनोत्संप्लुष्टं
वनमिवाग्निना। दिव्याम्बु जीवयेत् तस्य ज्वरं स्वाशु नियच्छति। तच्च क्षीरं लंघनोत्संप्लुष्टं जीवयेत् कायस्य स
श्वासं तामुत्पादयेत्। किं किमिव। अग्निना दग्धं वनं यथाम्बु जीवयेत् प्ररोहयेत्। तथा पयः
प्रक्षीरमिति। लंघनशोषणात् सामान्यं लंघनवान्स्य तस्य भवेत्। शरीरलाघवकरं यत्तद्द्रव्यं कर्म वा
पुनः तल्लंघनमिति तेषामित्येवं लक्षणं ननु विशिष्टमुपवासलक्षणं पोष्यतावशात्। तस्य ज्वरिणः
पुंसः क्षीरमाशु ज्वरं नियच्छति न केवलं जीवयेदिति चार्थः। १० संस्कृतं शीतमुष्णं वा तस्माद्धारो
ष्णमेव च। विभज्य काले युञ्जीत ज्वरिणं हन्त्यतोऽन्यथा। यत एवं महागुणं क्षीरं तस्माद्धेतोः संस्कृतं द्रव्यांतरे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

35

न॥७॥प्रतीएककफपित्तस्यत्रिकपृष्ठकटिग्रहे॥दीप्ताग्नेर्बद्धशकृतः प्रयुंजीतानुवासनं॥प्रतीए
कफपित्तेयस्यपुंसस्तथादीप्ताग्नेर्बद्धवर्चाश्चत्रिकपृष्ठकटिग्रहेस्तस्यानुवासनंप्रयुंजीत॥ पाकाले
१८ ॥पटोलनिंबघन्दनकटुकाचतुरंगुलैः॥ खिरावलागोक्षुरकमदनोशीरवालुकैः॥पयस्यर्द्धो
दकेक्वाथंक्षीरशेषविमिश्रितं॥कल्कि तैमुस्तमदनकृस्नामधुकवत्सकैः॥वस्तिर्मधुघृता
भ्यांचपीत्वैयतज्वरनाशनं॥प टोलाद्यैःक्वाथंक्षीरेर्द्धोदकेक्षीरशेषंतयाभिमिश्रितंकल्की
कृतैर्द्रव्यैर्मुस्तादिभिःमधुघृताभ्यांचयोजितं॥वस्तिर्ज्वरनाशनंदद्यात॥७॥चतस्त्रःपर्णिनी
पृष्ठीपर्णीशालपर्णीपद्मगान्॥क्वाथयेत्कल्कयेद्द्राक्षापानाह्वाफलिनीफलं॥मुस्तंचवस्तिस्स
तत्स्व देहे व्याप्यपि देहस्थिति निबंधनं देहस्य स्थितयो नानावस्थास्तासां निबंधनं कारणं कारणमेव
विवृणोति यन्नाश इत्यादि क्षयहेतूनाह ओजः क्षीयते कोपक्षुद्ध्यानशोकश्रमादिभिरिति क्षुद् बुभुक्षा
ध्यानं चिंता आदिशब्दाद् व्यवायकटुरूक्षादयः ओजः क्षयं लक्षयति बिभेतीत्यादि बिभेति त्रस्य-
ति दुर्बलो हीनबलो भवति अभीक्ष्णं पुनः पुनः अवक्षमा ध्यायति चिंतयति व्यथितेंद्रियः हृदयादिस्था
नेषु व्यथावान् दुश्छायो मलिनकांतिः दुर्मना विगतोत्साहः रूक्षो निःस्नेहांगः क्षामः कृशांगः स्वयोवध
मो र्यावृद्धिहेतुमाह जीवनीयेत्यादि जीवनीया जीवकादयः रसो मांसरसः अपिशब्दात् क्षीरादयः ओ
जोवृद्धिं लक्षयति ओजोवृद्धावित्यादि तुष्टिः संतोषः पुष्टिः स्थौल्यं बलोदयः शक्त्युत्कर्षः ओजोवृद्धेस्तु हंसनेप
ष्यादिहेतुत्वात् न वातादिवृद्धिवद्विकारित्वम् वृद्धमपि यदा व्यापद्यते वा स्वस्थानात् तदा वातादिवृद्धिका
रित्वं तथाच सुश्रुते त्रयो दोषा बलस्यौजसो व्यापद्विस्रंसनक्षमाः बलमोजः वृद्धिक्षयो ज्ञात्वा यदनुबं
धं तत्संक्षेपेणाह यद्यदन्नमित्यादि यद्यदन्नं द्वेष्टि तत्त्यजेत् तथा यद्यत्प्रार्थ्यते तत्तत्समभ्यसन् तौ तौ वृ
द्धिक्षयौ जयेत् समभ्यसीयादित्यर्थः किं तत्सर्वमित्याह अविरोधि त्विति यत्प्रार्थयते तच्चेदविरोधि
अपथ्यं न भवति तत्समभ्यसीयादित्यर्थः तच्च देशकालकरणाद्यपेक्षमपि बोध्या ज्ञेया न च यथा रूक्षपा

न्तारव्यस्यानुवितत्वमाशंकनीयं । हि यस्मात् क्षीणा दोषा विपरीते रुचिं कुर्वंति क्षीणाः समाने च कारात् वृद्धा
दोषाः समाने द्वेषं कुर्वते क्षीणास्तु विपरीते इत्यपि ज्ञेयं अयमेवार्थः यदा वायोर्वृद्धिस्तदा तद्विपरीतानां
स्निग्धादिगुणानां रुचिस्तत्समानां रूक्षादीनां द्वेष उत्पद्यते अत एव द्वेषसेवनाद्विपर्ययाद्वायोर्वृद्धिं
जयेत् यदा तु वायुक्षयस्तदा तत्समानां रूक्षादिगुणानां रुचिस्तद्विपरीतानां स्निग्धादिगुणानां द्वेषः
उत्पद्यते अत एव रुचिसेवनाद्द्वेषत्यागाद्वायोः क्षयं जयेत् एवं पित्तादिष्वपि दोषग्रहणं दोषधातु
रो मलानामुपलक्षणं अपि च पुनः कदाचिदन्यथापि रुचिद्वेषौ भवतः यथा नश्यति हि सामेव
वायौ कटुरूक्षाभिलाषेण तद्विधोपचारेण चेति एवं सत्यप्येतावता रशाँस्थितिमवधानं लक्षयंति ए
१८ तेन वृद्धिमतामिव जायमानापरीक्ष्यापरमुपचारः कार्यः मंदबुद्धीनां तु यथोपदेशमित्युक्तं भवति उक्तं च
संग्रहे यथोक्तानुसारेणैव प्रयोगो मंदबुद्धेरिति उक्तयोः रुचिद्वेषयोरुपपत्तिमाह यथाबलमित्या
दि वृद्धा दोषा रूपाणि रौक्ष्यादीनि वितन्वंते विशेषेण प्रकटयंति तान्येव क्षीणा जहति न्यूनानि
दर्शयंतीत्यर्थः यथाबलं वृद्धाः अधिका अधिकतरा अधिकतमाः बहूनि बहुतराणि बहुतमा
नि एवं क्षीणेष्वपि यथास्वं वायू रौक्ष्यादीनि पित्तमौष्ण्यादीनि श्लेष्मा स्नेहादीनीत्यर्थः एतदुक्तं
भवति शरीरे यो दोषाधिको गुणो भवति तस्य तस्य द्वेष उत्पद्यते यो यो हीनं तस्य तस्य रुचिरुत्पद्यते
घ

४५१

वायौ वृद्धे रूक्षादयः शरीरे व्याधिका भवंति ततस्तेषां देहे बहुलायते सीलेन एव हीना अतस्तेषां रु
चिः एवं पित्तादिष्वपि समेषु पुनर्दोषेषु अपूर्वा रुचिर्देहे बोजोत्पद्यते इत्यत आह समाः स्वं कर्म कु
र्वते इति स्वशब्देन देशकालजातिवयोनुरूपं शारीरं कर्मोच्यते न दोषकर्म तस्य यथा स्वमित्य
नेन लब्धत्वात् तस्माज्जात्यादिवशाद्यस्य यथा रुचिर्देहे यौतस्य तथैवानुवर्त्तंते समा दोषा
नान्यथा कुर्वंतीत्यर्थः दोषवैषम्यानुत्पादने यत्नो विधते यत्वेत्यादि हितचर्यापथ्याभ्या
माहारविहाराभ्यां चरतेर्गत्यर्थ भक्षणार्थत्वात् एवं शब्देन हितचर्यायाः अयोगोऽहितचर्या
या योगो व्यवछिद्यते इति हेमाद्रिटीकायामायुर्वेदरसायने दोषादीनां प्रकरणं सांख्येन निरू म६
पिते दोषभेदीयमध्यायं व्याख्याय तुप्रति जानीते अथातो दोषभेदीयमित्यादि यतः पूर्वाध्या
ये दोषदूष्यमुक्तं तदग्रे दोषभेदाद्धुधाभिधीयते दोषभेदज्ञानार्थमयमध्यायः अतः एवायं दो
षभेदीयः तद्भेदश्च स्थानकर्मावस्था हेत्वाकृतिसाधनसंयोगभेदाद्भवति तत्र स्थानतो यथा
चितो यं प्रकुपितोयं हेतुतो यथा मिथ्यायोगकुपितोयं अतियोगकुपितोयं आकृतितो
यथा स्वसलक्षणोयं व्यासलक्षणोयं साधनतो यथा स्निग्धोपशमोयं उष्णोपशमोयं संयोगतो
कट्वाशयस्थो वायुः कटिस्थोयं कर्मतो यथा स्रावसोच्छ्रासप्रवर्तिकोयं अवस्थातो यथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा पितृपुत्रौ पंगुस्कंधपुत्रो वामिति एवं पित्तादिष्वपि तत्रादौ दोषस्थानतो भेदः स्थानं द्वेधा सामा
न्यविशेषं च तत्रादौ सामान्यं तत्र वायोः स्थानमाह पक्वाशयेत्यादि पक्वाशयो नाभेरधः पक्वा
टि२२ न्नस्थानं कटी श्रोणी विबद्धं वं सक्थिनी पंगु ऊरू तं श्रोत्रे कर्णौ स्पर्शनेंद्रियं त्वक् तत्र तेषु स्थानेषु मध्ये
पक्वाधानं पक्वाशयो विशेषतः स्थानं पित्तस्याह नाभिरित्यादि आमाशयो नाभेरूर्द्ध्वमपक्व
स्थानं लसीका स्वादुसमलो जलप्रायस्त्वगाश्रयः रक्तं चक्षुः स्पर्शनं त्वक् अत्र एषु स्था
नेषु मध्ये नाभिर्विशेषतः स्थानं कफस्याह उरः कंठेत्यादि उरो वक्षः क्लोम उदकवहस्रोतो मू
लं हृदयसिरातो मांसग्रंथिः पर्वाणि संधयः घ्राणं नासा एषु मध्ये उरो विशेषतः स्थानं पृथ॰
विशिष्टं स्थानं कर्म च सामान्यं कर्म उत्साहादेः पूर्वाध्याये निर्दिष्टत्वात् तत्र वायोर्विशेषमा
ह प्राणादीनि प्राणादयः प्राणोदानव्यानसमानापानाः पंचात्मा पंचविशेषः प्राणस्य स्थान
कर्माण्याह प्राणोत्रेत्यादि प्राणस्य स्थानकर्माण्याह प्राणोत्रेत्यादि प्राणस्य मूर्द्धावस्थि
ति स्थानं उरः कंठश्च विचरणस्थानं बुद्ध्यादिधारणं ष्ठीवनादिकरणं च कर्म हृदयं मनोधि॰
ष्ठानं चित्तं मनः इंद्रियाणि चक्षुरादीनि उदानस्याह उरः स्थानमित्यादि उदानस्योरो वसतिः
स्थानं नासादि विचरणस्थानं वाक्प्रवृत्त्यादिकं कर्म प्रयत्न उत्साह ऊर्जा प्रीणनं व्यानस्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हृ व्यान इत्यादि व्यानस्य हृदयमवस्थितिस्थानं सर्वशरीरं विचरणस्थानं गत्यादयः सकलाः क्रि +53
याकर्म अपक्षेपणमंगस्याधोनयनं उत्क्षेपणमूर्द्धनयनं तस्मिन्प्रतिबद्धास्तदेकानिष्ठा प्रा
महाजवः प्राणादिभ्यो वेगवान् समानस्याह समानोऽग्नीत्यादि समानस्याग्निसमी
पमवस्थितिः स्थानं सर्वकोष्ठे विचरणस्थानं अन्नस्य ग्रहणं गृहीतापाचनं पक्वा
सारविट्कविवेचनं विविक्तकिट्टमोचनं च कर्मः अग्निसमीपमग्निस्थानमस्य
गृहे तथा चास्याग्न्यनलबलकारः अपानस्याह अपान इत्यादि अपानस्याऽ हृ६
पानं गुदमवस्थितिः स्थानं श्रोण्यादि विचरणस्थानं शुक्रादिनिष्क्रमणं क
र्मवस्ति मूत्राशयः मेढ्रो मूत्रमार्गः गोचरो विचरणविषयः पित्तविशेषा
नाह पित्तं पंचात्मकमिति पाचकरंजकसाधकालोचकभ्राजकभेदा
त्पंचधा पित्तं पाचकस्य स्थानकर्माण्याह तत्र पक्वेत्यादि पाचकस्या
पक्वामाशयमध्यं ग्रहण्याख्यं स्थानं अन्नस्य पचनं पक्वसारकिट्टविभागो रंजकादिचतु
ष्टानुग्रहकर्म कीदृक् तत्र यत्नं च भूतात्मकत्वेऽसत्यपि तेजोभूतगुणाधिक्यात्तद्वत्वं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथा पाकादीनामग्निकार्याणां करणादनलः नलसंज्ञोऽनलः एतेन पाचकापेक्षयाग्नि
पित्तयोरभेदो रंजकाद्यपेक्षया भेद इति मतद्वयं व्यवस्थापितं तत्र स्वं स्वस्थानस्थं रंजकस्या
ह आमाशयेत्यादि रंजकस्यामाशयस्थानं रसरंजनं कर्म साधकस्याह बुद्धीत्यादि सा
५८ धकस्य हृदयं स्थानं बुद्ध्यादिद्वारेणाभीष्टसाधनं कर्म अभिमानोऽहंकारः आलोकस्याह रू
पेत्यादि आलोचकस्य दृग्दृष्टिः स्थानं रूपालोचनं कर्म भ्राजकस्याह त्वगित्यादि भ्राज
कस्य त्वक् स्थानं त्वचो भ्राजनं प्रकाशनं कर्म संगृह्णन् तदभ्यंगपरिषेकलेपादीन् पाचय
तीत्युक्तं कफविशेषानाह श्लेष्मा तु पंचधेति अवलंबकक्लेदकबोधकतर्पकश्लेष्मकभेदा
त्पंचधा श्लेष्मा अवलंबककर्माण्याह उरस्थ इत्यादि अवलंबकस्योरः स्थानं त्रिकाद्यवलंबनं
कर्म त्रिकस्य पृष्ठाधारस्य स्ववीर्येण आत्मप्रवेशनादवलंबनं करोति हृदयस्यान्नवीर्याच्च का
रात्स्ववीर्याच्च हृदयावलंबनेऽन्नवीर्यसहकारि अन्नरससहितेनेति सूक्ष्मवचनात् तस्य
एव शेषाणां कंठादीनां कफस्थानानां जलव्यापारेण क्लेदनतर्पणपूरणादिनाऽवलंबनं करो
ति केचित्तु बाहुग्रीवास्थित्रयस्य संघातं त्रीकमाहुः तदसत् त्रिकं पृष्ठवंशाधार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवंरूढत्वात् रूढिस्तु योगाद्बलीयसी आसन्नत्वं च प्रयोजनं द्वितीयस्यापि कफ
धामाग्रमवलंबनात्केः क्लेदकस्याह यत्त्वित्यादि क्लेदकस्यामाशयस्थानं अन्नसंघातक्लेदनं क
र्म बोधकस्याह रसेत्यादि बोधकस्य रसनेंद्रियस्थानं रसबोधनं कर्म तर्पकस्याह
शिरःसीत्यादि तर्पकस्य शिरः स्थानं इंद्रियतर्पणं कर्म श्लेषकस्याह संधिश्लेषात् इति श्लेष
कस्य संधयस्थानं संधिश्लेषणं कर्म प्रकरणार्थमुपसंहरति इतीत्यादि प्रायेणेत्याकुलत्वेन
यद्यपि सर्वशरीरव्यापिनस्तथापि अति [illegible] प्रायेणैतेषु तिष्ठंतीत्यर्थः अविकृतात्मनामच्युता
त्मनां तु नस्थाननियमः इति स्थानकर्मप्रकरणं [illegible] सा च द्वेधा साम्यवैषम्यं च वैष
म्यं च द्वेधा क्षयो वृद्धिश्च वृद्धिर्द्वेधा चयप्रकोपभेदेन चयप्रकोप क्षयसाम्यभेदाश्च तस्यावस्थाः
तत्र क्षयसाम्यप्रशमशब्देनोच्यते निष्पाद्यमानस्य प्रशमस्य क्षयरूपत्वात् निष्पन्नस्य साम्यरूप
त्वात् प्रशमहेतूनां प्रसादादिति योगे पुनः क्षयहेतुत्वात् क्षयहेतूनामपि प्रशमहेतुत्वाच्च तत्रैव
यादिनिदाने तत्र वायोराह उष्णेत्यादि उष्णेन गुणेन युक्ता रूक्षादयो वायोः संचयं कुर्वंति त
एवेन शीतेन युक्ताः कोपं उष्णेन युक्ताः स्निग्धादयः शमं कुर्वंति पित्तस्याह शीतेनेत्यादि शीतेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाटी-१२५

756

युक्ताश्चीत्याशादयः पित्तस्य चयं कुर्वते तएवोष्णेनयुक्ताः कोपं शीतेनयुक्ता मंदाद्याः शमं कुर्व
ते कफस्याह शीतेनेति शीतेन युक्ताः स्निग्धाद्याः कफस्य चयं कुर्वते तएवोष्णेनयुक्ताः कोपं
उष्णेनयुक्ताः रूक्षाद्याः शमं कुर्वते अथ चयादित्वं तत्र चयं लक्षयति चयोवृद्धिरिति दोषः
स्यवृद्धिश्चय सा च प्रथमं स्वधाम्न्येव भवति यावानेवाशयः संचारवतादोषेण व्याप्तस्तावानेव निः
चारेण व्याप्यते स च संहरति रूपत्वात्संचयाख्यः ततः सर्व एव आशयो व्याप्यते तदा वृद्धिहेतुस
मद मानगुणेषु द्वेष उत्पद्यते स च कोपप्राग्रूपत्वात्स कोपाख्यः ततः परस्याशयं प्रविशति तदा विपरीत
गुणेच्छा च कारा समानगुणेषु द्वेषश्च सरूपत्वात्प्रसराख्यः कोपलक्षयति कोपास्विति उ
स्र६ मार्गगामित्वात्स्वमार्गादन्यमार्गगमने कोपः तत्र यदा प्रथमं स्थानमभिभूयान्यत्स्थानं व्याप्नोः
तदा व्याधेर्यालिंगानां शैत्यादीनां दर्शनं स समंतादन्यस्थानाश्रयणात् स्थानसंश्रयाख्यः ततो विकु
र्वाणो ज्वरादि रूपेणाभिव्यज्यते तदा स्वास्थ्यं प्रकृतस्य यथावत्स्वरोगरूपेणाभिव्यक्तत्वाद्व्यक्ता
ख्यः ततस्तमेव रोगमवस्थांतरापन्नं अनुभवन् भवत्युतिस्तदा रोगसंभवः संभवो दीर्घकालानुव
र्तनमिति यावत् सा च स्या रूपभेदत्वात् भेदाख्यः एताश्च षडवस्थाः सुश्रुतेस्य च युक्ताः संच
यं च प्रकोपं च प्रसरं स्थानसंश्रयं व्यक्तिं भेदं च यो वेत्ति दोषाणां स भवेत् भिषक् तदत्र भोजनं च

दे-१२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शरदि प्रशमः पित्तस्य वर्षासु चयः शरदि प्रकोपः
हेमंते प्रशमः श्लेष्मणः शिशिरे चयः २

२१ 751

संचयेपि हता दोषा लभंते नोत्तरा गतीः ते तूत्तरासु गतिषु भवंति बलवत्तरा इति प्रशमं लक्षति स्वस्था
नेति स्वस्थानत्वं समत्वं अतिक्रांतं नं चेति मिलितप्रशमलक्षणं रसवर्णस्पर्शाद्यन्यत्वं विकारः
चयादीनां कालमाह चयप्रकोपेति वायोर्ग्रीष्मे चयः वर्षासु प्रकोपः वसंते कोपः ग्रीष्मे प्रशमः
कालनियमे युक्तिमाह चीयत इति ग्रीष्मे आहारस्य देहस्य च लघुरूक्षत्वं करोति ताभ्यां लघु
रूक्षो वायुश्चीयते न तु कुप्यत्युष्णेन प्रतिबद्धत्वात् वर्षाकाले आहारस्याम्लपाकित्वं करोति ते
नाम्लविपाकेन पित्तं चीयते न तु कुप्यति शीतेन प्रतिबद्धत्वात् शिशिरे आहारस्य देहस्य च स्नि
ग्धशीतत्वं करोति ताभ्यां स्निग्धशीतः कफश्चीयते न तु कुप्यति शीतेन घृतवत् घनीभूतत्वात् का
लादाहारादीनां बलित्वमाह इति कालेति आदिशब्दाद्विहारो देशश्च लघ्योपि स्वकालं विनापि
यांति स्वकालेपि न यांति प्रकोपशमयोः क्षिप्रविपरिणत्यावृत्तामाह व्याप्नोतीति सहसा वेगेन
मलो दोषः अल्पाल्पचिरेण जलौघवत् नदीपूरवत् सहितेन न बद्धे विरेणं द्रमते अपहेतु त
द्धिशेषाणां निःशेषहेतुव्यापयितुमसमर्था सामान्यं वाक्यं तदेवाह नानारूपैरित्यादि वि
काराणामसंख्यत्वं प्रतिविकारं च रूपाणामसंख्यत्वात् तद्वेनादि प्रति विकारं वक्तुमसमर्थे सा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धारणतूच्यते तत्रदोषहेतुरेवसाधारणोरोगहेतुः तत्रयुक्तिमाह दोषाइत्यादि दोषाएवकार
णं दोषाःकारणमेवेत्येवकशब्दाभ्यामुच्यते अत्रार्थेदृष्टांतद्वयं यथापत्तीदेशभेदेपिछायाः जर
संबंधनंत्यज्यति तथाविकारोदेहसंबंधं यथाचमहदादिपृथिव्यंतंकार्यंगुणसंबंधनंज्यति
किंदोषजमेवदोषसंबंधनमपेक्षतइत्याह तथास्वधातुवैषम्यमित्यादि योधातुर्यस्यरोगस्याधिष्ठानत्वेनोक्तः
सतस्यस्वधातुःतस्यवैषम्यंक्षयोवृद्धिर्विकृतत्वंउन्मार्गत्वंतन्निमित्तंयस्यतत्तथा रसजानामपिदोषैर्विनानो
त्पत्तिः दोषकोपहेतुमाह तेषामित्यादि सचत्रिविधः असात्म्यविषयसेवादुःकालोदुःकर्मचे
ति सोपिप्रत्येकंत्रिधा हीनयोगोतियोगोमिथ्यायोगश्चेति तत्रासात्म्यविषयसेवायास्त्रैवि
ध्यंलक्षयति हेनार्थेनेत्यादि इंद्रियस्यचक्षुरादेःस्वेनार्थेनरूपादिनाल्पःसंयोगः नैववासंयो
गोहीनयोगः विशेषोल्कतयाअनिवृत्तिर्हीनत्वमित्यर्थः उत्कटानिवृत्तावपिसेवनमतियोगः सू
क्ष्मादिरूपसेवाअत्युच्चादिशब्दसेवापूत्यादिगंधावा अत्यम्लादिरससेवा अतिशीतादिस्प
र्शसेवाच मिथ्यायोगः भासुरमतिदीप्तं भैरवंभयंकरं विप्रियंदुष्टं दुःकालस्य त्रैविध्यंलक्ष
यति कालस्त्वित्यादिना शीतोष्णवर्षाभेदात्त्रिविधः कालस्यशीतोष्णादीनामल्पत्वंहीनयोगः
अत्याधिक्यमतियोगः दुःकर्मणस्त्रैविध्यंलक्षयति कालेत्यादिना कायिकवाचकमानसभे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देन त्रिविधकर्मणः प्रवृत्तेरल्पत्वं हीनयोगः आधिक्यमतियोगः वेगोदीरणादिरूपत्वं मिथ्यायोगः धार
णं वेगधारणं विषमैः दुःस्थितैरंगैः क्रि या या श्लेष्मा प्राग्भारंभः सा चेह तस्य भाषणमथ भोजने मौनः
त्यागः प्रपतनाभिघातादिर्हिंसा स्तेयेत्यादि दिनचर्याक्रमम् अहासिन्जन्मनि अमुत्र प्राग्जन्मनि संगृ
हेतु त एते तियोगादयः साम्यतोनुपलक्षणः सर्वे वा प्रज्ञापराध एवायं परेषामपि वर्जनं अर्थ
कर्मकालाः पुनस्सम्यग्योगेनोपकारात् भूयिष्ठं स्वास्थ्यहेतव तत्राप्यरसवर्ज्या विषया यथाय
रसकर्म सिद्धिं यं बाधंते नुग्रहं तिष्ठो बांस्तं देहं अपि च सर्वभावा भावोनां तरेण योगातियोगादिना स्वस्थ त
ना सर्वेषां पुनर्विकाराणां निदानदोषदूष्यविशेषेभ्यो भावाभावविशेषा भवंति यदा ह्येते निदाना
सर्व ८ दि विशेषा नान्योन्यमनुबध्नाति ईषद्वानुबध्नंति अबलावान् तदाभिनिवर्तंते व्याधिरिरा
द्वाभिनिवर्तंते न वा भवंत्यसंपूर्णलिंगा वा विपर्यये तु विपरीताः तथान्यः प्रधानमेव रोगोन्यस्य प्रधान
नस्य हेतुर्भवति यथा ज्वरो रक्तपित्तस्य रक्तपित्तं वा ज्वरस्य ते श्वासस्य प्लीहा जठरस्य ते त्वथा अर्शांसि गु
ल्मोदरातिसार गुह्यणीदोषाणां प्रतिश्याय कास ज्वरयोः रक्तपित्तः समस्य समः शोषस्य एकस्मा
द्वा निमित्त एकस्य व्याधेर्बहूनां च तथा बहवः तद्देकं लिंगं एवमेकः प्रशमोप्युपायः तथासए

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वान्यस्य प्रकोपे तस्माज्ज्ञानवद्भिः तैः सम्यगागमादिभिः परीक्षेत तत्रातो रोगमेकैकं मे
वं प्रकोपनमेवं योनिमेवमात्मानमेवमधिष्ठानमेव वेदनमेवं रूपशब्द स्पर्श गंध रस
मेवं पूर्वरूपमेवमुपद्रवमेवं वृद्धिस्थानक्षयान्वितमेवमुदर्कमेवं नामानं तस्मि
वृ४ न्नियं प्रतिकारस्य प्रवृत्तिरथवा निवृत्तिः प्रत्यक्षतस्त्वातुरस्य यथास्वमिंद्रियैर्वर्ण
संस्थानप्रमाणोपचयच्छायाविण्मूत्रछर्दितादिकमन्त्रकूजनमंगुल्यादिसंधिस्फुरनं
देहे मास्फुलनादि गंधं शीतोष्णस्तंभस्वेदनश्लक्ष्णखरत्वादिस्पर्शीश्च प्रकृति विकृति प्रमाणं ग्रासं
तु प्रक्षेपेन तथायुर्षद्वेदुःषर्दत्वं मृदुक्रूरकोष्ठानां स्वप्नदर्शनमभिप्रायं जन्मामयप्र
तिनसत्वादिविशेषसुदुःखानि च तथा च यः प्रमक्षेण अनुमानेन तु प्रकोपसर्वेणा
नशरीरवैरस्यं मक्षिकोपसर्पणेन माधुर्य्यं तथाग्निं जरणेन शक्त्या बलं व्यायामश
क्त्या गूढलिंगं व्याधिमुपशयानुपशयतः दोषप्रमाणमुपचारविशेषेण आयुःस
दंरिष्टैः प्रकृतिसत्वसारसात्म्यवलान्यनुशीलनेनेति भवंति चात्र ज्ञानबुद्धिप्र
दीपेन यो नाविशति योगवित् आतुरस्यांतरात्मानं न स रोगांश्चिकित्सति द्विवमे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्याधिस्वरूपस्याप्रकाशकौ तथैवैको गुरुव्याधिसंदेहे बलाम्रुपातलघुव्या
धिवदाभाति लघुव्याधिस्वतोन्यथा वाह्येवागममात्रेण तयोर्मुह्यति बालिशाः ततोल्पमल्पं
दीर्घंवाविपरीतमनोषधंवापथ्यं विपर्यये युंजनप्राणाननु मुष्णाति रोगिणां ज्ञानांशेन
नहिज्ञानं कृत्स्नं ज्ञेयं प्रवर्त्तते वुभुसेतमपि षकु तस्मात्त्वं तंत्रानुशीलनात् स्वभि
युक्तस्तु सततं मालेभ्य सर्वथा न जातु स्वलति प्राज्ञो विषमेष्वित्रि पायये आगंतुर
न्वेति निजं विकारं निजस्तथागंतुमतिप्रवृद्धः तत्रानुबंधं प्रकृतिं च सम्यक् ज्ञात्वा
ततः कर्मसमारभेतेइति दोषहेतुमुपसंहरन्ति निदानमेतद्दोषाणामिति दोषहेतौ
रोगहेतुत्वमाह कुपिता इति तेन निदानेन स्वनेकधा विविधानीति हेत्वानंत्यात्
कोपानेत्य तस्माद्रोगानंत्यं दोषा एव कारणमित्युक्तं तस्मिन्नीहार्थमाह शाखा
कोष्ठमर्मसंधिश्वितिपत्रखादीनामाधारत्वेन कारणत्वं तत्रशाखात्वाध्यावचे शाखे
त्यादि रक्तादयो धातवः त्वक् च शाखा सा च बाह्यरोगायनं वहिर्मार्गो रोगाणां
तेच रोगा मषादयः मवव्यंगो सुद्रोगेषु गंडालमुखरोगेषु वहिर्मार्ग इति दुर्ना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मादीनां विशेषणमंतर्भागनिवृत्त्यर्थः कोष्ठं व्याचष्टे अन्नेत्यादि अंतरं तत्र मार्गे
णरोगाणां महास्रोतो महाविवरं आमाशयो पत्र मलेति वृत्ति पक्वाशयो य
त्रयं तत्स्थाना कोष्ठाश्रिताः अंतरमार्गं स्रुतोपादीनां विशेषणं बहिर्मार्गनिवृ
त्यर्थं समाहारद्वंद्वादेकवचनं नपुंसकत्वं अस्थिसंधीन् व्याचष्टे शिरा इत्यादि मर्मा
णि मर्माणि वक्ष्यः शिरादयस्थास्थिसंधयः ते च मध्यमो रोगमार्गस्तदाश्रिता य
क्ष्मादयः यक्ष्मा राजयक्ष्मा च पक्षवधः एकांगरोगः अर्दितमेकायामः ग्रह
स्तत्र्यत्वं संध्यस्थित्रिक मूलादयः ऊष्याकृतिः तत्र वातरोगाणां लक्षणमा
ह स्रंसव्यासव्यध स्वापेत्यादि स्रंसः शैथिल्यं व्यासो संकोचनं व्यधः सूचीवि
द्धस्येव व्यथा स्वापः स्पर्शाज्ञानं सादः स्वकार्याक्षमत्वं रुक्शूलं तोदस्तोत्रेणे
व व्यथा भेदनं भिद्यमानस्येव व्यथा संगो वरोधः अंगजन्मो मार्गगमनं अंगेग
मनत्वात् भंगो वक्रता संकोचो अप्रसार्यत्वं वर्त्तनं पिंडीतत्वं हर्षणं कंटको

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततं तर्पणं पिपासा कंपश्चलनं पारूष्यं सौक्ष्म्यं शोषो वैवर्ण्यं संधुत्वं शोषमुक्तत्वं स्पंदनं स्तु
रणं वेष्टनं वलनं स्तंभो निष्ठुरत्वं कषायरसता रसांतरेण कषायेग्रहं ह्यपावः कपिलः
अरुणाईबद्धत्वः स्त्रसादीनि कुपितवायोः कर्माणि पित्तरोगाणां लक्षणमाह पित्तस्येत्या
दि दाहः संतापः रोगोरंजनं वर्णांतरोपमर्दना स्ववर्णापादनं तुष्णोष्मत्वं पाकित्तया
पाचकत्वं स्वेदोघर्मः क्लेदोमलार्द्रत्वं स्नुतिःस्रावः कोथः पूतिभावः सदनसादः मू
र्च्छामोहः मदोमदादिभिर्वमत्तता कटुकस्तिक्तोरसः कषायतिक्तमधुरं खातादिषु मुख्यः
क्रमात् इतिवचनात् अथ श्लेष्मरोगाणां लक्षणमाह श्लेष्मण इत्यादि स्नेहस्निग्धत्वं
धः संश्लेषः उपलेपालिप्तत्वं स्तैमित्यमालस्यं शोफः श्वयथुः अपक्तिमपाकः चिरकारि
ता चिरेणोगवृद्धिः संग्रहे तु अथ कुपिता वातादयो नानाविधैर्विकारैः शरीरमुपता
पयंति आविर्त्ततमात्तु वायोरशीतिर्विकाराः चत्वारिंशत्पित्तस्य विंशति श्लेष्मणः त
त्र वातविकाराः तद्यथा नखभेदः १ विपादिका २ पादशूलं ३ पादभ्रंशः ४ पादसुप्तता ५ पा
दखुडता ६ गुल्मग्रहः ७ पिंडिकोद्वेष्टनं ८ गृध्रसी ९ जानुभेदः १० जानुविश्लेषः ११ ऊरुसादः १२ ऊरु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

763

वा॰रो॰ १४३

765

स्तंभः२३ पंगुत्वं२४ गुदभ्रंसः२५ गुदार्त्तिः२६ वृषणोत्क्षेपः२७ मेढ्रस्तंभः२८ वंक्षणानाहः२९ श्रोणिभेदः
३० विड्भेदः३१ उदावर्त्तः३२ खंजत्वं३३ कुब्जत्वं३४ वामनत्वं३५ त्रिकग्रहः३६ पृष्ठग्रहः३७ पार्श्वावमर्द
नं३८ उदरावेष्टः३९ हृन्मोहः३० हृद्द्रवः३१ वक्षउद्धर्षः३२ वक्षउपरोधः३३ वक्षस्तोदः३४ बाहु
शोषः३५ ग्रीवास्तंभः३६ मन्यास्तंभः३७ कंठोध्वंसः३८ हनुजाड्यं३९ ओष्ठमर्दनः४० दंतभेद
४१ दंतमर्दः४२ दंतशैथिल्यं४३ मूकत्वं४४ वाक्संगः४५ प्रलापः४६ कषायास्यता४७ मुखशो
षः४८ रसाज्ञत्वं४९ घ्राणनाशः५० कर्णमूलं५१ उच्चैःश्रुतिः५२ बाधिर्यं५३ वर्त्मस्तंभः५४
वर्त्मसंकोचः५५ तिमिरं५६ अक्षिशूलं५७ अक्षिव्युदासः५८ भ्रूव्युदासः५९ शंखभेदः६०
ललाटभेदः६१ शिरोभेदः६२ केशभूमिस्फुरणं६३ अर्दितं६४ एकांगरोगः६५ सर्वांगरोगः
६६ पक्षवधः६७ आक्षेपकः६८ दंडकः६९ श्रमः७० भ्रमः७१ वेपथुः७२ जृंभा७३ ग्लानि७४
विषादः७५ रौक्ष्यं७६ पारुष्यं७७ श्यावारुणावभासत्वं७८ अस्वप्नः७९ अनवस्थितत्वं८० पित्तस्य
विकाराः पुनः ओषः१ प्लोषः२ दवः३ दवथुः४ विदाहः५ अंसदाहः६ त्वग्दाहः७ अंतर्दाहः८ धूमकः
९ अम्लकः१० ऊष्माधिक्यं११ अतिस्वेदः१२ दौर्गंध्यः१३ अंगावयवदारणं१४ शोणितक्लेदः१५

हे॰ १४३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स १

मांसक्लेदः १६ त्वगवदरणं १७ चर्मदलनं १८ रक्तकोठः १९ रक्तविस्फोटः २० रक्तमंडलानि २१ रक्त
पित्तं २२ हरितत्वं २३ हारिद्रत्वं २४ नीलिका २५ कक्षा त्रुटिः २६ कामला २७ तिक्तास्यता २८ लोहित
गंधास्यता २९ पूतिमुखत्वं ३० तृष्णाधिक्यं ३१ अतृप्तिः ३२ आस्यपाकः ३३ गलपाकः ३४ अक्षिपाकः ३५
गुदपाकः ३६ मेढ्रपाकः ३७ जीवादानं ३८ तमःप्रवेशः ३९ हरितहारिद्रनेत्रमूत्रवर्चस्त्वं ४०
श्लेष्मविकारास्तु तृप्तिः १ तंद्रा २ निद्राधिक्यं ३ स्तैमित्यं ४ गुरुगात्रत्वं ५ आलस्यं ६ मुखमाधुर्यं ७
प्रसेकः ८ श्लेष्मोद्गिरणं ९ मलाधिक्यं १० बलासः ११ हृदयोपलेपः १२ कंठलेपः १३ धमनीप्रतिचयः
१४ गलगंडः १५ अतिस्थौल्यं १६ शीताग्नित्वं १७ उदर्दः १८ श्वेतावभासता १९ श्वेतमूत्रनेत्रवर्चस्त्वं २०
तत्र सर्वांगीणस्तीव्रो दाहः स्वेदातिमात्रः ओषः प्रादेशिकः स्वेदरहितः तात्पर्यविषवदाहः प्लोषः मु
खोष्णतुल्यदाहो दवः वसुरादिच्छिद्रेषु दाहो दवथुः पादपाणिकक्षामूलेषु विविधः संतापो
विदाहः कोष्ठदाहोऽन्तर्दाहः कोष्ठस्यान्तर्मार्गस्य ग्रहात् शिरोरोगे वा कंठतालुषु धूमायनं धूमकः धम २
सान्तर्दाहहृदयशूलो भ्रमोऽम्लकः शोणितस्य गंधो दौर्गंध्यात् तनुत्वादि क्लेदः मांसस्य त्वक्ता
दौर्गंध्यं वा ह्यात्वक्तां हरति श्रमः कोष्ठगो रवा दाहात्स्पृहा तृप्तिः अन्ये पुनराहुः अन्नान

ग्रा २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिनेदनात्पिशिरिवत्पशिरसोनकः नैदानं स्वेव विषया गृह्णंते दुःखैमित्यंतु प्रमीलकद्वयन्वेविपदंति
उपलेप इवोपलेपस्तदतिशयः प्रतिश्यायोऽतिपूरणं प्रगुरतिमांद्यमौत्यं उरोऽभिष्यंदोऽस्य ः
केषांचित् वेपथुरुदर्दः अन्येपुनराहुः शीतपानीसंस्पर्शात् कीनकाले विसेषतः सरागगंडुश्वोफः स्या
६४ दुदर्दः सकपोइवंति महाविकारास्तु यथा स्वमुपदेक्ष्यते क्षुद्रविकारास्तु पुनर्यदेवांगमाविशंति
तदुपपदमेव लभंते नाम यथा नखललाटशंखभेदाः सांतर्दाहकंठहृदयोपलेपादयः तेषां तित
थैव स्वरूपमुपदिष्टं भवति लक्षणज्ञाने सावधानेन भवितव्यमित्याह दुःखशोभेत्यादि दर्श
नाद्येर्दर्शनस्पर्शनाभ्यासो लक्षणज्ञाने सावधानेन भवितव्यमित्याह अवस्थाविभागो
यथा आमज्वरो जीर्णज्वरो पच्यमानज्वर इति लक्षणदर्शनाभ्यासो लक्षणज्ञानुसहकारी
त्याह अभ्यासादित्यादि व्याधेस्त्रैविध्यमाह दृष्टेत्यादि अपचारो निदानं दृष्टकर्मजः अदृष्टक
र्मजः दृष्टादृष्टकर्मज इति त्रिविधो व्याधिः त्रयाणां लक्षणमाह यथेत्यादि यथानिदानं हेत्व
नतिक्रमेण दोषेभ्यो दृष्टजः हेतुभिर्विना जातः कर्मजो दृष्टजः पूर्वापचारजः अल्पे हेतौ महा
रंभत्वात् दोषकर्मजः दोषक्षोभपूर्वकर्मत्वात् दृष्टजस्य दोषजत्वं तद्विपरीतत्वाद्दृष्ट

766

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दोषवशात्ते भूयः सप्तविधः सकलोपि चायं रोगसमूहः प्रतिकारवानायुर्वेदविहितो दो
शमयेस्तत्र यस्मान्नियति हेतुकोप्यामयः सम्यगभिज्ञानदेशानुष्ठानादुपात्तायुः संस्कार
परीक्षणे सत्यवेदनतां प्रतिपद्यते अनुपक्रम्यमाणस्तु सर्वप्रायसोपि नात्यकांडे स्वयं
मपि दैवानिदानात्मतया चानिवर्तमानाः षोडशगुणसमुदितक्रियोपलंभात्‌ अप्युतर
मपरिक्षिप्युन्नाशमुपगच्छति अनियतफलादायिनि दैवविहिताभ्यासरतस्यावकाश
मेव लभते न व्याधिः तस्मान्न कस्याचिदवस्थायामात्मवान् हिताहितयोस्तुल्यदर्शी
दु नस्यात्‌ त्रिविधाश्च पुनर्व्याधयो मृदुमध्यातिमात्रभेदेन तत्राल्पलक्षणो मृदवो मध्य
लक्षणा मध्याः संपूर्णलक्षणास्त्वतिमात्राः तेपुनः सुखसाध्यादिभेदेन चतुर्धा प्राग्‌
दिष्टाः सुबहुशोपि समिधमाना व्याधयो निजागंतुतो न व्यभिचरंति तत्र निजा हि दोषो
त्थाः तेषु व्यथापूर्वमुपजायंते ततो दोषवैषम्यं दोषवैषम्येणैव बहुरूपारगमुपयांते
वर्द्धते च एवं चद्वौ स्थान दोषव्यतिरेकेण रोगानुबंधः केवलं पौर्वापर्यविशेषः तस्मादेका
रा एते रोगाः तथा रूक्‌ सामान्याद संख्यभेदा वा प्रत्येकं समुत्थानस्थानसंस्थानवर्णना
मवेदनाप्रभावोपक्रमविशेषाधयास्थूलं यथा स्वमुपदेक्ष्यंते ग्प्रसंख्येयत्वाद्व दोषलिंगै
रेषु पूर्वं चानादयो वैषम्यमापद्यंते नते तो व्यथा अनिवर्तन्ते वा द्वौ हेतव स्त्वागंतवः ४

767

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रेवरोगाऽनुपक्रमं चवमजेत् शास्त्रेऽनुक्तं स्वयमूहनीयमित्याह विकारेत्यादि प्रोविकारस्य
वातजादित्वं जानाति नामनजानाति शास्त्रेऽनुक्तत्वात् संकीर्णत्वाद्वा सन् जिह्रीयात् नलज्जां कु॰
र्यात् नहि नामाधीना सर्वत्र चिकित्सा वातजादिज्ञानं हि चिकित्सायां प्रधानं कारणं प्रथसा
धनं साधनज्ञानं च लक्षणज्ञानाधीनं तत्र लक्षणस्य दुर्बोधत्वमाह स एवेत्यादि स एव योन्य
त्रलक्षितः बहून् विकारान् कुरुते येन्यत्र न दृष्टास्तत्र द्वौ हेतू समुत्थानविशेषात् कुपितत्वं॰
स्थानान्तरप्राप्तिश्च समुत्थानविशेषोन्यत्रादृष्टं समुत्थानं तस्माद्विकारादि त्रितीयज्ञा
नपूर्वकमुपक्रमं कार्यः स च कुपितो ध्रुवमेव स्थानान्तरोपतिभयात् प्रकृतिः स्वभावोऽसाधरणं वि
कं दुष्याद्येकादशज्ञाने सत्यव्यभिचार्युपक्रम इत्यत आह दूष्यमित्यादि दूष्यो धातुमलं
देशो भूमिर्देहश्च बलं सामर्थ्यं कालः पूर्वाह्णादिः अनलो विषमादिः प्रकृतिर्वातप्रकृत्ये॰
त्यादिः वयो बाल्यादिः सत्त्वं मनः सात्म्यं देशसात्म्यादि आहारो मधुरादिः अवस्था रूपेष्व
वांतरं रूपं सूक्ष्मसूक्ष्माः असूक्ष्माः एषां रोगाणां दोषौषधानुरूपेण दोषस्यौषधस्य वा वि॰
चारणं तत्रापि सर्वदेहपो र्वलतात्पर्येण परीक्ष्यमित्याह गुर्वल्पेत्यादि संस्थानलक्षणं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यथाकारं गुरोरल्पत्वं अल्पस्यापिगुरुत्वं अवाहितत्वे दोषमाह गुरुमित्यादि अल्पोयं
दोषइत्यगणनया विधत्तिपघते विपरीतंजानाति विपर्ययज्ञानेदोषमाह ततोस्ये
त्यादि अयोगतो हीनयोगेन वा विपरीतमतिमात्रमतो वैर्यवा विपर्यये लघुव्याधौवपु
रपि अतिशायेनस्यं तयेन्नदोषा नेव अशेषं परीक्षायामभ्यादरः कार्यइत्याह अतो
भियुक्तइति अथ संयोगः तस्य त्रिषष्टिभेदानाह नस्यंतेऽतः परीमिति दोषादोषभेदा
विभेदः साम्यंतत्साम्यंचास्ति वृद्धौ क्षयेचास्ति वृद्धिक्षयवत्साम्यंच भेदकारणं तत्रवृ
द्धिसाम्याभ्यां द्वादश तत्र पृथक् त्रीस्त्रि द्विदोषवृत्त्येकं वृद्ध्यापंचविंशतिरित्येवं
वृद्धेरित्युपसंहारात् वारोगोप्यद्विशः साम्येन यथावायुर्वृद्धः पित्तकफौ समौ पित्तंवृ
द्धं वायुकफौ समौ कफो वृद्धो वायुपित्ते समे संसर्गत्रिधा विद्धिः वायुपित्ते वायुकफौ इ
ति तत्रत्रीन् संयोगान् न विद्धि तत्रत्रीन् समया वृद्ध्या यथापित्ते वृद्धे कफसमः वायु
पित्ते वृद्धे कफसमः वायुकफौ वृद्धौ पित्तं समः पित्तकफौ वृद्धौ वायुसमः एकस्यातिश
येन षट् यथा वायोः पित्तं वृद्धं कफसमः पित्ता वायुवृद्धः कफसमः कफाद्वायुर्वृद्धः पित्तं समः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायोः कफो वृद्धः पित्तं समं पित्तात्कफो वृद्धो वायुः समः कफात्पित्तं वृद्धं वायुः समः एवं
द्वादश वृद्धेष्वेव समस्तेषु त्रयोदश संयोगान् विद्धि तत्रैकस्माद् द्वयोर्वृद्धयोः क्षीणत्वं य
था वायोः पित्तकफौ वृद्धौ पित्तात्कफवायू कफाद्वायुपित्ते द्वाभ्यामेकस्मिन् वृद्धे हीन
कु५ वातपित्ताभ्यां कफो वृद्धः वातकफाभ्यां पित्तं पित्तकफाभ्यां वातः तुल्याधिकैरेवं यथा वा
तपित्तकफा वृद्धाः तारतम्यविकल्पनायामर्द्धे यथा वायुपित्तकफाः वृद्धतराः वृद्धतमाः एवं
वायुकफपित्तानि पित्तकफवायवः पित्तवायुकफाः कफवायुपित्तानि कफपित्तवायवः
एवं त्रयोदश एतं वृद्धे पञ्चविंशतिं विद्धि तैरेव क्षीणैस्तावन्तो वृद्धिः वृद्धिस्थानेऽतीतः क्षीणाश
वृद्ध्युपयोगात्त्रेयाः वृद्धिक्षयसाम्येषु वृद्धक्षीणसमस्तेष्वद्वन्द्वेन स्थानेन वृद्धक्षीणसमसंयोगा
त्त्रेयाः तेषां लक्षणमुक्तं संग्रहे रोगावस्थासु युगपद्वृद्धिः साक्षयेऽक्षयानुगं बद्धं हि दुर्बो
धत्वं विकारैरिति दृश्यते २ प्रकृतिस्थं यदा पित्तं वृद्धो वायुः कफक्षये स्थानादादाय गात्रेषु
यत्र यत्रोपसर्पति २ तदा भेदश्च दाहश्च तत्र तत्रानवस्थितो गात्रदेशे तथास्यातां बलहा
निपरिक्षयौ २ प्रकृतिस्थं कफं पित्तं क्षये वायुर्यदा बली कृषौ कुपित्तदाः शूलसशैत्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तंभगौरवं ४ प्रकृतिस्थं यदा वातं पित्तं वृद्धं कफक्षये संप्रकोपि तदा दाहः शूलं वास्योपजायते
॥५॥ प्रकृतिस्थं कफं वृद्धं पित्तं वायोः क्षये यदा संनिरुन्ध्यात्तदा कुर्यात्तंद्रां गौरवं ज्वरं ६ प्रकृ-
तिस्थं यदा वातं क्षीणे पित्ते कफोऽधिकः संनिरुन्ध्यात्तदा कुर्याच्छीतकं गौरवं ज्वरं ७ प्री-
तकं शीतपूर्वकं ज्वरं प्रकृतिस्थं यदा पित्तं वृद्धश्लेष्मानिलक्षये संनिरुन्ध्यात्तदा कुर्याद्धातु-
मंदाग्नित्वं शिरोगुरु ८ निद्रां तंद्रां प्रलापं च हृद्रोगं गात्रगौरवं क्षीवनं पित्तकफयोर्नखादीनां
दो॰६ पीतता ९ येषां वृद्धिक्षययोर्विकाराः कीर्तिताः पृथक् दोषेषु पितृ तानेवं कल्पयेद्
यथायथं १० एकक्षयद्वंद्ववृद्धिः स्यात्त्रयः यथा वायुः क्षीणः पित्तकफौ वृद्धौ पित्तं क्षीणं क-
फः समः इति त्रिधा वृद्धिभेदः स्वास्थ्यकारणं एते भेदा रसादिभिर्दूष्यैः प्रत्येकं संसर्गाद्बहवो
भवंति तथाऽऽमरोगो दूष्याणां संख्यादिभेदैः संसर्गजन्तोपि बहवः तेषामेव तारतम्ययोगभेदैः
संसर्गजन्तोपि बहवः एवमानन्त्यं जातान्मुपवहितमानसो जानीयात् यथास्वं स्वेन लक्षणेन
इति हेमाद्रिटीकायामायुर्वेदरसायने दोषभेदप्रकरणं सामस्त्येन निरूपितम् अथ दोषोपक्र-
मणीयमध्यायं व्याख्यास्यामः इति जानीते लक्षणस्कंधानंतरमौषधमारभ्यते तत्रेति दोषोपक्र-
मस्यैव सर्वरोगौषधत्वात् उपक्रमणमौषधं तत्र वातस्यौषधमाह वातस्योपक्रम इति स्नेहः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्नेहपानादिः स्वेदस्तापादिः शोधनं वमनादिः तत्र मृदुर्हीनयोगेन कृतां वेष्टनं वलितं वस्त्रादिना
समंतात् बंधनं त्रासनमस्माद्भयोत्पादनं सेकः सेचनं बस्तयो निरूहाः बस्तिर्नियोनुवासनं तस्य
बस्तिनानियमत्वात् सुखशीलता सुखाभ्यासः स्नेहास्तैलादयः तिलतैलान्तशीतैलगोघृत
महार्षघृतादिभेदादनेकयोनयः दीपनैस्त्रिवृत्कादिभिः पाचनैः मुस्तादिभिः सिद्धाः पक्वाः
स्नेहानां पुनर्वचनं यथाकथंचिदपि वातघ्नत्वज्ञापनार्थं मद्यं मेदुरं यत् पिशितं मांसं त
स्यरसः तिलतैलमनुवासनं चेति ९ एतत्तत्रयं विशेषेणौषधं पित्तस्यौषधमाह पि
त्तस्य सर्पिषः पानमिति सुगंधशीतहृद्यानां द्रव्याणां चंदनादीनां ये गंधास्तेषामुपसेव
नं कंठे गुणानां कंठावलंबिनां हाराणां मुक्तावलीनां येमणयस्तेषामुरसा हृदयेन धारि
उसीरं वीरणं पुरेव स्कंदं विनापि स्वयंत्रेण मुखं यन्मुखेन नियंत्रेण न करोति मुग्धामृदु
ला उद्यानदीर्घिकाः क्रीडावनवाप्यः सुतीर्थः सोमनवर्तनैर्मार्गैः विपुलस्वच्छ स्वयः शा
लिलाशयः तस्य सैकतेसि कताभयप्रदेशे सांभोजे जलतीरयोरंतः संधिर्यस्मिन्सैकते
कायमानं सेवनागारं सौम्याभावः मनः प्रसादनाः पदार्थाः पयः सर्पिर्विरेकश्चेति चतुर्थं
विशेषादौषधं श्लेष्मण औषधमाह श्लेष्मणो विधियुक्तामिति विधिनायुक्तं तीक्ष्णां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शोधनं तेस्रोन शोधनेन व्यापदां संभवात् अत एव मृदुमध्यं वातपित्तयोर्युक्तं रतिः प्रीतिः
रत्या संभोगे प्रीतिर्न तु रतिः वमनाद्यकं विशेषाद्यौषधं सुखाय सुखसाध्यमाद्यधर्माय
निसुखत्वं दुःखानुभावः नाधर्माय तस्य रोगमदहेतुत्वात् संसर्गसन्निपातानामौषध
माह उपक्रम इति यथास्वं स्वमात्मीयं विशेषमनतिक्रम्यातिकल्पयेत् यथा वातपित्त
संसर्गे वातपित्तौषधमेलनमविशेषेण तस्मिन्नेव वाताधिके वातौषधमाधिक्येन पित्ता
धिके पित्तौषधमाधिक्येन एवमन्यत्राधि संसर्गभेदानामौषधान्तरमाह ग्रीष्म इति
मरुत् पित्ते संसृष्टे ग्रैष्म उपचारः कार्यः कफमारुते वासंतः कफपित्ते शारदः तत्र शारद
स्य कफपित्तघ्नत्वाद्युक्तो निर्देशः ग्रैष्मस्य पित्तघ्नत्वाद्वा संतस्य कफघ्नत्वाद युक्तः तत्रा
ह मारुतो योगवाहित्वादिति योगसंबंधं वहतीति निर्वहति द्वितीयस्यानुसारेणेति
योगवाहि तेन पित्तयुक्तस्य वायोः पित्तघ्नत्वेनोपशान्तिः कफयुक्तस्य कफघ्नेनोपशां
तिः प्रायो ग्रहणमनुचितासायस्यत्यागोपि औषधकालमाह चय एवेति चय एव दोषं
जयेत् न कोपं प्रतीक्षेत अथ कथं चिच्चयातिक्रमे कुपितं दोषं न जयेत् तं पुनरविरोधय
न् जयेत् कुपितो द्विविधः प्रकृतिसमसमवेतो विकृतिविषमसमवेतश्च तत्र प्रथमे दो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्य स्वरूपतुल्यं रोगस्य रूपं द्वितीये विपरीतं यथा कफज्वरे कफाविपरीतमुष्णत्वं तत्र ज्वरस्वरू
पस्य कफकोपविरोधित्वात् अत्युष्णमौषधं न कार्यं वक्ष्यति हि उष्मापि त्वाः स्रोतो नास्ति ज्वरो नास्त्यु
ष्मणा विना तस्मात्पित्तविरुद्धानि त्यजेत्ताधिके धिकमिति सर्वेषां युगपत्कोपादौ वलीयां
नं तं त्यजेत् शेषदोषमविरोधयन् संग्रहकरस्त्वाह तत्रासृक्प्रयोगो हेतुः यः सृक्वपा
देयस्तस्मात्तयोर्लक्षणमाह प्रयोगाद्भुति दोषाणां परस्परं सङ्गत्युक्तं संग्रहे शुद्धमलम
लंजेतुं नाल्पभावादुभावपि शेषादोषात्मकत्वाद्धि न साम्यातिपरस्परं शीतस्निग्धाम्ल
वणकट्वादि गुणतुल्यता मिथ अत्रदृष्टा दोषेषु नातीनाम्यं जयंतीति आरंभकं विरोधेपि
मिथोयद्गुणानां विश्वस्वरूपं युगपत् व्याधेर्दोषत्रयं तथेति अथ स्थानभेदोपक्र
मउच्यते तत्र दोषाणां स्थानांतरप्राप्तिप्रकारमाह व्यायामादिति व्यायामादिभिश्चतु
र्भिः कोष्ठस्था दोषाः शाखाख्यं बहिर्मार्गं यांति मध्यं वास्थिमर्माख्यं तथा शाखास्थाश्च
स्थिमर्मस्था वा स्रोतोमुखविशुद्ध्यादिभिः कोष्ठं यांति अभिष्यंदनं द्रवीभावः कोष्ठस्था
किं कुर्युरित्याह तत्रस्था श्चेति यत्स्थानं प्राप्तास्तत्र विलंबिते यावत् स्थानांतरगमने हेतुं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नलभंते लब्धेहि तोपुनः स्थानांतरं यांतिइत्यर्थः स्वस्थाने परस्थाने वाविलंगमा
दोषाः स्वैः स्वैः प्रकोपनैः कुप्यतीत्याह तेकालादिबलमिति आगंतोर्दोषस्यहीन
बलस्यस्थानि चिकित्साकार्येत्याह तत्रेति तद्दोषां स्वस्थाने यः कुपितस्तस्यचिकि
त्सां आगंतोरपि प्रबलस्य स्वचिकित्सैव कार्येत्याह स्थामेवेति आगंतुस्थानिनो
तुल्यबलयोः क्रमेणचिकित्साकार्येत्याह आगंतुमिति स्थानिनं प्रतिकृत्यागंतुं
शमयेत् अथवागंतुंप्रतिकृत्यस्थानिनं शमयेत् प्रतिकृत्यप्रतिकारं कृत्वाप्रायद्
ति ज्ञात्वाकोष्ठप्रपन्नांश्चेत्यादि तिर्यग्गताशोधनमार्गपरित्यज्यस्थिताः यंतवे
१७५ देहंवाशोधयितुमशक्यंश्चिरंक्लेशयंतीति अतस्तेषुत्वरयाचिकित्सांकुर्यात्
देहमग्निंबलंच वीर्यशनैःशनैः कुर्यादित्यर्थः तास्तिर्यग्गताःशमयेत् अथवा
देहमग्निंबलंच वीर्यप्रानैःशनैः कुर्यादित्यर्थः तास्तिर्यग्गताःशमयेत् अथवा
सुखमक्लेशेन स्नेहेन स्वेदादिना प्रयोगेणकोष्ठमानमानयेत् ततऊर्द्धमधोवानिर्हरे
त् अल्पत्वबहुत्वाभ्यांविकल्प्य यावस्थातिचार्यो अथसदोषोपक्रमः तत्रसामल
क्षणमाह स्रोतोरोधेत्यादि निरामाणां लक्षणमाह निरामाणामिति निपर्ययः

वा·टी·१५· [illegible] मलक्षणमाह
[illegible]

स्रोतोमुखान्यास्य: आममलक्षणमाह उष्मण इति उष्मणोऽल्पबलत्वेन धातुं न दोषं मलं वा
आद्यं न रक्तादिकं रसं न रसत्वोपरस्य रसमेव लीलिमाबात सामत्वं व्याचष्टे आमेनेत्यादि
आमेन दोषैर्धातुभिर्मलैश्च जनिता रोगा अपि सामा उच्यन्ते सामेषु दोषेषु अवस्थाविशेषे
श्लो ५ ण शोधनं निषेधति सर्वदेहप्रसृतानिति व्याप्तदेहान् धातुलीनानुत्क्लिष्टान् सामान्न
शोधयेत् ते हि दुर्निर्हरत्वादाश्रयस्य नाशाय स्युः तानेव शोधनयोग्यान् कृत्वा शोधयेत्
दित्याह पाचनैरिति परिकृतत्वात् शोधनयोग्यतां नीतान् तत्र पाचनैः पक्वत्वं दी
पनैः धातुभ्यः पृथक्कृत्वं स्नेहैरुत्क्लिष्टत्वं स्वेदैः कोष्ठगतत्वं यथासन्नत्वं व्याचष्टे
हेत्याशु युक्तमिति आमाशयादामाशयमपि व्याप्य पक्वाधानात्पक्वाशयमपि व्या
प्य ल्यलोपे पंचमी ऊर्ध्वं जत्रुस्थान जत्रुस्कंधसंस्थितस्योर्ध्वं जत्रूर्ध्वप्रवृत्तान् सा
मान्स्तंभयेदित्याह उत्क्लिष्टानिति धारयेदिति स्वयंप्रवृत्तेषु सामेषु पेक्षैवमेव
जमित्याह प्रवृत्तानिति प्राक् प्रथमं यावन्न बलहानिः स्वयंप्रवृत्तेषु सविबंधेषु
पाचनं निर्हरणं वा कार्यमित्याह विबंधानीति पूर्ववद्विकल्पव्यवस्था अथौष
धकालमाह तत्रौषधं द्विविधं शोधनं शमनं च तत्र स्वस्थस्य शोधनकालमाह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रावणइति स्राधामणे ऋषि शीतोष्म रहिते हेतुर्गर्भ वेदं विशेषणं संधि नियमेनासं 777
धौ शोधनं निषेधति अत्युष्णवर्षशीता इति संधाविति स्वस्थवृत्तामिति उष्णवृष्ट्योः
वृष्टिशीतयोः शीतोष्णयोश्चावगमो ऽ मावस्यासंधीः स्वस्थवृत्तमभिप्रेत्य स्यो
वारामिप्रायेण स्वस्यास्यापि रोगानुत्पत्ते शोधनमुचितं व्याधितस्य शोधनका
लमाह व्याधाविति तु त्वेति प्रयोजयेत् व्याधिवशेन यदैव व्याधिरुत्पद्यते तदेव
प्राणावस्थावस्थान प्राणावस्थरं समनौषधाकालमाह युंजादिति ग्रासेग्रास इति
यत्राहारे जीर्णे भेषजं भेषजे जीर्णे आहारस्तदनभक्तं नाम यत्र गृहीत एव
त्रौषधे आहारस्तदादौ प्राग्भक्तं नामः यत्रार्द्धे आहारे भेषजं पश्चात्शेष आहारस्तन्म
ध्ये मक्तं नामः यत्स्तुतिग्रासं युक्तमौषधं तद्ग्रासे ग्रासे सग्रासं नाम यद्गृहीत्वा भक्तम् ४
पुनरौषधं तन्मुहुर्नाम यदाहारेण सहसाधितं मिश्रीकृतं चौषधं तत्सान्नं नाम
यत् त्रादौ भेषजं ततोनंतरमेवाहारः ततोनंतरमेव पुनर्भेषजं तत्सामुद्गं नाम स
मुद्गः संपुटः यद्रात्रौ स्वप्नकाले भेषजं तन्निशि नैश्यं नाम एवं दशौषधकालाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अभक्तस्य विषयमाह कफोद्रेके गत इति अह्नस्तृतीयो योंशः श्लेष्मकालस्तं उद्रेके क भक्तस्यर
फोद्रेकः तस्मिन् गते तदनंतरमेव प्राग्भक्तस्य विषयमाह अन्नादाविति मध्ये वि
षयमाह समाने मध्य इति अधोभक्तस्य विषयमाह व्यानेंत इति व्याने विगु
णे प्रातर्भोजनस्यांते भेषजं उदाने उदाने विगुणे सायं भोजनस्यांते ग्रासग्रासां
तयोर्विषयमाह ग्रासग्रासांते मुहुरौषधस्य विषयमाह मुहुर्मुहुरिति सान्नस्य
विषयमाह योज्यमिति सामुद्गस्य विषयमाह कंपेति निशो बध विषयमाह उर्द्ध
जत्रुविकारेष्वति संग्रहेतु एकादशौषधकालाउक्ताः अंतरभक्तो यत्पूर्वाह्ने भु
क्ते जीर्णे मध्याह्ने भेषजमुपयुज्यते तस्मिन् जीर्णे पुनरपराह्णे भोजनं एते
न रात्रिर्व्याख्याता तदीप्ताग्रेर्व्यानजेष्वन्नमये क्षित्वेति यथा तत्राद्यं काले तृषितः
पीतावर जीर्णेक्षुधितः क्षाममश्न भेषजं वर्जयेत् शेषेषु चाहृद्य सात्म्यमितिः
तीक्ष्णोग्रगंधं भूरिमात्रं च भवंति चात्र रोगमादौ परीक्षेत ततोनंतरमेष
जं ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् २ निवृत्तोपि पुनर्व्याधिः स्वल्पेना
याति हेतुना दहेदाविः कृतोदोषः शेषः सूक्ष्म इवानलः २ तस्मात्तमनुवधी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

या प्रयोगेण न पापिनां सिद्धानामपि दोषाणां पूर्वे यां दाहमावहन् ३ सांतःपा
त्वादिभावाच पथ्यं देवत्वमागतं कल्पनाविविधैस्तैस्तैः प्रियत्वं गमयेत्पुनः ४ म
नसोर्थानुकूलेन तृप्तिरूर्जा रुचिर्बलं सुखोपयोगता च स्यात् व्याधेश्चातः परिक्षयः
५ लौल्याद्दोषवशाद्यानां व्याधेर्वै बन्धनाद्धयोराहितैः ताखु [illegible] योगेनान्नं प्र
कल्पयेत् ६ समाहेन गुणान्नामेति यामन्यां प्रयोजयेत् पूर्वस्यां शान्तवेगायां न लद
पा६ क्रियासंकरो हितः ७ गुणोत्वल्पोपितामेव दिशो वात्वा [illegible] य मे वर्जनं यत्तेहद्यमव्य
मल्पान्न येषु चि ८ [illegible] मेव हु गुणैर्लाल्वः प्रजोजितं मनन्व का [illegible] हितं तन्मि बह ६
न्नगुरुसंमतं आस्वादितं पथिचरैः स्वयं चानुप्रयोजयेत् उचितोपस्य देशस्तु ज्ञं तस्यो
पधं हितं १० देशे प्यवरापि न स तत्स्तु ल्प गुणाजन्म च वीर्यं तद्भावितं संप्यनुं स्वादसे
रसत्वं वेसु ११ रसगंधादिसंपन्नं काले जीर्णे च मात्रया एकाग्रमनसोद्युक्तां मे
धजं त्वमृतायते १२ मेधजमवचारयन् प्राज्ञेन तावद्रासुरं परिक्षेत कस्मिन्नयं
जातः संवृद्धो व्याधितो वा तस्मिन्देशे मनुष्याणामिदमाहारजातं एवं विहारं जा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मात्बह्वलमेवंविधं सर्वं एवंविधं सात्म्यमीषं शक्ति रिमे व्याधयो हितमिदम
हितमिदमिति प्रायोगृह्णेणैकेन वानिदानविशेषेण स्वकुपितो दोषो दोषस्यैकस्या
पि वहवः प्रकोपहेतवः तस्माद्यथा स्थूलतृणैः कर्म भिषग्बुद्ध्यापि दोषमवगमयेत्
तद्यथा किमाहारेण कुपितो वायुः किं विहारेण तथा रूक्षेण लघुनाशिशिरेण सा
हसेन वेगरोधेन भयेन शोकेन वेति ततस्तत्प्रशमनमेवौषधं प्रयुज्यमानमाशु सि
द्धये संपद्यते तत्र मधुराम्ललवणाः कटुतिक्तकषायाश्चेतरेतरं प्रतिपक्षास्तदनन्तरं
चोपलमेत् महदुमध्यातिमात्रविकल्पनया कथं निदानमासेवितमेकरूपस्यापि
हेतोर्मृद्वादिभागेन पृथक् समवेतानां च दोषाणामंशांशबलविकल्पविशेषाश्चा
धैर्बलाबलविशेषः तत्रानेकदोषात्मकेषु व्याधिष्वनेकरसेषु भेषजेषु दोषरसप्रभा
वमेकैकशोऽभिसमीक्ष्य व्याधिभेषजप्रभावतत्त्वं व्यवस्येत् न त्वेवं सर्वत्र न हि विकृति
विषमसमवेतानां परस्परेणोपगृहीतानामुपहतानां चान्यैश्च विकल्पैर्विकल्पि
तानामवयवप्रभावात् समवगच्छेत् तथा कस्य चामाधिकायव्याधि रयमवस्थितं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

781

इतिनिर्णयेत् प्रतिस्रोतोहि दोषः स्वकीयमेवस्थानमातेकाधाधितिष्ठन् म्रद्धीदीर्घश्च वादुस्तरो
भवति ततः स्थानविशेषेण भेषजविशेषः पर्यीक्षितव्यः तत्र ऐवमालोचयेत् कस्या
यमौषधस्य व्याधिरातुरो वा योग्यः किमतो वा दोषानुरूपो हि भेषजवीर्यप्रमाणविक
ल्पो व्याधितवलाद्विशेषो भवति सहसाति वलानि संशोधनौ यथान्याग्रेपवाय व्यान्पति
ममा१ सौम्यति मात्राणि वा तथाग्निक्षारशस्त्रकर्माण्यल्पसत्वमातुरमल्पवत्तं वा निपातयुः संशाम
नानि तु व्याधिवलादधिकानि तमुपशाम्य व्याधिं व्याधिमप्यपि तेरौ शीघ्रमन्यमाहुः इति शरी हे
रवलादधिकानि ग्लानि मूर्छा मदमोह वलक्षयात् शरीरवलादधिकानि ग्लानिमग्निसादं
च अपि चाति स्थूलोति कृशोति दुर्वलो दुष्टमांसप्राणिता सर्व्वगावयवो स्त्यग्निरत्या
हारो सात्म्याहारो पाचितसारवट्ठितो वा व्याधिवलमेव तावदसमर्थः सोढुं पुनस्तथा
विधो भेषजवेगं तस्मादिदृशमवीषाहकरं मृदुसुखैरुत्तरोत्तरगुरुभिर्विभ्रमे स्त्वपा
चरेद्दोषघ्नैर्विशात् अवलाश्लास्थानवस्थितमद्दु विलम्बहृदयाः प्रायसकुमाराः परं स
स्ताप्यांश्च ततोपि विशेषेण शिशवः तथा वलव्याध्यातुरो त्यवलमल्पं च भेषज
मकिंचित्करं भूयएव दोषानुतेजस्य व्याधिमुदीरयेत योग्यमपिचौषधमेवं परीक्ष्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न२ न१

इदमेवंरसवीर्यविपाकमेवंगुणमेवंद्रव्यमेवंकर्म एवं प्रभावमस्मिन्देशे जातमस्मिन्नृतावेवं
न२ गृहीतमेवंनिहितमेवंनिर्वापितमेवमुपसंस्कृतमेवंसंयुक्तमेवंयुक्तमनयामात्रया एवंविध
स्यपुरुषस्यैवंविधे काले एतावंतंदोषमपकर्षत्युपशमयतिवा अन्यदपिचैवंविधंभे
षजमभूत्तच्चानेनान्येन वा विशेषेणायुक्तमिदमकरोत् सूक्ष्माणि हि दोषभेषजद्रव्य
देशकालबलाहारसात्म्यसत्वप्रकृतिवयसामवस्थांतराणि यान्यनालोचितानि निहन्यु
रातुरं आलोच्यमानान्यपि तु विपुलबुद्धिमपि चिकित्सकमाकुलीकुर्युः किंपुनरल्पबु
द्धिं तस्मादमीमांसाशः शास्त्रार्थकर्मानुशीलनेन संकुचितप्रज्ञो अपि च संति व्याधयो ये शा
स्त्रोदुत्सर्गापवादैरुपक्रमप्रतिनिर्दिष्टाः तत्र प्रज्ञयैव दोषादिगुरुलाघवेन सम्यग्व्यवस्येत्
अन्यतरनिष्ठायां कालश्च भेषजयोग्यतामापादयति सतु क्षणलवमुहूर्तादिभेदेन आ
तुरावस्था याच द्विधोक्तः प्राकृतमपि च तत्र शीतोष्णवर्षलक्षणश्चर्तवस्तयो हेमंतग्रीष्मवर्षा
ख्यास्तेषामंतरे शोधनार्थं साधारणं वसंत प्रावृट् शरदाख्यास्त्रयो विकल्प्यंते तत्र शोध
नं प्रति फाल्गुनचैत्रौ वसंतः आषाढश्रावणौ प्रावट् कार्त्तिकमार्गशीर्षौ शरत शीतोष्णवर्षा

र२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लक्षणस्त्रिविधः कालः तत्र शीतोष्णयोर्वृष्टिशीतयोश्चान्तरेण साधारणो वसन्तजल
यात्ययो ग्रीष्मवर्षाकालयोस्तु प्रारंभो न दृष्टेः प्रावृडिति विकल्पते तेषु साधारणेष्वाह
सु वमनादीनां प्रवृत्तिर्हि तेषु योत्तियोग भयात् साधारणे हि मंद शीतोष्णवर्षीत
या सुखत्वाद्दुःखं स्व विकल्पका शरीरौषधानां विपरीतास्विन्तरे तथाहि शीत
कालेतिमात्रशीतोपहतत्वाच्छरीरमत्यर्थं शीतवातविष्टब्धमिति स्तब्धबद्धगु
रु दोषं भवति तदनुप्राप्तं च भेषजं संशोधनार्थं मुष्णस्वभावमपि शीतोपहतत्वात्
मंदवीर्यतां गतमयोगाय जायते शरीरं च वातप्रायोपद्रवाय तद्वद्वर्षास्वपि स
मंतात् प्रतिघनेन घनसंघातेवततेन मस्तुपरुद्धे तेजः प्रसवे दुर्दीनकरकीरणे बुज
ना५ लदपटलप्लावनोपमवर्द्दमायां भूमौ अत्यर्थोपाक्लिन्ने सर्वस्मिन्नानलेवलमुद्रितो
मलवलमाहानदुर्वलं शरीरं भवति औषधग्रामस्तु जलदोदरप्रततप्रमुक्तधारा
संपातसंभृतो वानि वहो प्लावित मूलजालसारविटपो बहलीको मलपञ्च वा पर
वीतस्वेधसारोपुनरविवाललतामुपगतोल्पवीर्यो भवति अपरिसंस्थितयाच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ह्नि त्रिमलपाचाभिरम्लविपाकाभिः खगमृगाँसपादिशवधातुमूत्रपुरीषसं-
स्पर्शाभिरद्भिः सलिलपृषीकरानुविद्धशिशिरपवनसंपर्केन च धाराधरोष्म-
णा कोमलत्वादपरिणतस्यास्य तत्तरां विदाह्योत्पतते तेनासाववपक्वतामुपगतो
ध्रुवमयोगाय प्रथमसंगृहीतमपि चौषधं तोयानुगतमारुतोपहतेजगते
इति ग्रीष्मे पुनरादानोपहतत्वात् शरीरमुष्णरूक्षवातातपाध्मातमति स्विन्न-
मति शिथिलमति प्रविलीनदोषं भवति भेषजं पुनरनुष्ण [illegible] मपि तपनतरु-
णतरकरनिपाताद्दुष्मतीक्ष्णतामुपगतमति योगाय कल्पते शरीरं च पिपासा-
भ्रमक्लमोपद्रवाद्यत्तस्मात्साधारणेष्वेव तदंतराहेषु वमनादीनि योजयेत् न वेदात्या-
यिको व्याधिः आत्ययिके तु कृत्रिमगुणाधाने यथार्त्तु गुणविपरीतेन संयोगसं-
स्कारप्रमाणविकल्पैश्चोपपादितौषधमवहितो न वारयेत् आतुरावस्थास्तु काला-
कालज्ञा तद्यथा अस्यामवस्थायामस्यौषधस्य कालो कालो वा न ह्यप्राप्तातीतका-
लमौषधयौगिकं भवतीति औषधभेदाश्च संग्रहे दर्शिताः द्विविधमौषधमूर्जे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्करं रोगघ्नं च उभयमपि चोभयात्मकं बाहुल्येन निर्देशः तत्रोर्जस्करं द्विविधं रसा
यनं वाजीकरणं च रोगघ्नमपि द्विविधं रोगप्रशमनमपुनर्भवकरं च पुनश्च द्विविधं
धं २ द्रव्यमद्रव्यं च तत्र द्रव्यं त्रिविधं भौममौद्भिदं जंगमं चेति तेषु वक्ष्यमाणं हेमादि लव
णांतं पार्थिवं भौमं औद्भिदं पुनर्वनस्पतिवानस्पत्यवीरुधौषधिभेदेन चतुर्विधं भव
ति तत्र फलिनो वनस्पतयः पुष्पफलवान् वानस्पत्यः वल्लीगुल्मं च वीरुत् फ
लपाकांता ओषधिरिति जंगमोद्भवं तु मधुघृतादि जंगमं द्रव्यमाहुः अद्रव्यं पुनरु
पवासादिनिवातातपच्छायामंत्रसत्वसांत्वनभयत्रासक्षोभणहर्षणभर्त्सनस्वप्नजागरण
संवाहनादि तथा त्रिविधमौषधं दैवव्यपाश्रयं युक्तिव्यपाश्रयं सत्वावजयश्च त
त्रदैवव्यपाश्रयं मंत्रौषधिमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्व
स्त्वनप्रणिपातगमनादि युक्तिव्यपाश्रयमाहारौषधयोजना सत्वावजयः पुनर
हितात्मनो निग्रहः पुनरपि त्रिविधमपकर्षणं प्रकृतिविघातं निदानस्याग्र ई १
तेपुनरपकर्षणादयो द्विविधा बाह्याभ्यन्तरभेदात् तत्र बाह्यमपकर्षणं ग्रंथा
वुर्दीमययस्मक्रमिशाल्मा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिशस्त्राहस्तयंत्रादिभिः अभ्यंतरं वमनविरेचनादिभिः प्रकृतिविधानं शमनं त
त्रैवाभ्यंगस्वेदप्रदेहपरिषेकोन्मर्दनाद्यं अभ्यंतरं यदंतरमनुप्रविश्य वि
कोपयन्दोषान्संशमयति निदानत्यागो यथा दोषे शीतोष्णाशनव्यायामादीनां व
र्जनं स्निग्धरूक्षाशनप्रवहारश्च तत्र शस्त्रादिसाध्ये भेषजमुपक्रमते न तु भेषज
साध्ये शस्त्रादि पुनरपि त्रिविधं हेतुविपरीतं व्याधिविपरीतमुभयार्थकारि च
तत्र हेतुविपरीतं गुरुस्निग्धशीतादिजे व्याधौ रूक्षलघूष्णादि तथेतरस्मिन्नितरत् तु
व्याधिविपरीतं द्वौ मूलोपक्रमौ तौ च स्नेहस्वेदौ पंचकर्माणि वमनादीनि धूमाज्य
पानादीनि च तथा विम्लापनोपनाहनपानादीनि च यत्र दोषप्रशमनत्वे सत्यपि ज्वरे
विरोधतो हितं मुस्तपर्पटकं गूयवागूश्च प्रमेहे रजनीयवान्ने रक्तपित्ते चोर्द्धवि
रेचनं प्रयोगे वमनं उभयार्थकारि पुनर्द्रव्यवान्मयमौषधं यथाद्धर्गीदर्द न
मतिसारेनुलोमनं मदात्ययेमद्यपानं तुद्दग्धेग्निप्रतापनं पित्तं तर्गृहे विमार्गगे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

787

वातवेदः कटुकम्ललवणतीक्ष्णोष्णाभ्यवहारकृवह्निः पवनेनायस्वमार्गोपघातादनाय
व श्लेष्मणाच्चांतर्निगूढे स्वल्पोवह्निः शीतपचारः तत्योदितस्योष्मणोंतः प्रवेशेन कफवि
लापनायेति एवं विधं स्वविपरीतमेव सद्वेषजं हेतुव्याधिविपरीतार्थं करोति स्वनोषधं पुनः
द्विविधमेववाधनमनुवाधनंच तत्र सद्यः प्राणहरं वाधनं कालांतरेणानुवाधनमिति ॰
इतिहेमाद्रिटीकायामायुर्वेदरसायने दोषोपक्रमणीयस्तुसामस्त्येननिरूपितं अधे
तिद्विविधोपक्रमणीयमध्यायं व्याख्यातुं प्रतिजानीते यतः पूर्वाध्याये दोषाणामुपक्रमउक्त
स्तस्येदानीं भेदा वाच्याः तत्र द्वौ भेदौ मुख्यौ अत एवायं द्विविधोपक्रमणीयः उपक्रमभेदाना
ह उपक्रमेति उपक्रम्यस्य रोगस्य द्वित्वात्सामनिरामं यल्लाघवायकार्यायतल्लंघनं वृंहण
लंघने उदाहरति भवतइति भौममाप्यं चद्रव्यं वृंहणं इतरत्सामेयवायव्यनाभसं लंघनमिति
विभागेनतेद्वे भवतः स्नेहादीनामुपक्रमाणां वृंहणेरूक्षादीनां चलंघनेंतर्भावमाह स्नेह
नं रूक्षणमिति भूतानां द्वैविध्यात्स्नेहनरूक्षणादिवं द्वयं कारणं पृथिव्यादीनां वृंहणलं
घनरूपद्वैविध्याव्यभिचारात् लंघनभेदानाह शोधनमिति शोधनस्य भेदं लंघनं चाह यदी

भेदेन वृंहणलंघनयोर्लक्षणमाह वृंहणमिति
यद्वृंहणं वृहत्वाय स्थौल्याय नद्वृंहणं ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रयेदिति निरूहइति यद्दोषान् वहिर्निकाशयेत्तच्छोधनं तत्तु निरूहादिभेदात्पंचधा काय
परेकं विरेचनं शिरोरेको नस्यं शमनस्य लक्षणं भेदांश्चाह नशोधयतीति पाचनमि
ति यद्दोषान्न शोधयति वहिर्न निष्काशयति समान् विकृतान्नोदीरयति न विकृतिं नयति
विषमान् विकृतान्समी करोति प्रकृतिं नयति तच्छमनं तच्च पाचनादिभेदात्सप्तधा स्नु
हन्न वर्जनं तदुदक वर्जनं शोधन शमन व्यतिरिक्तस्यौषधस्याभावात्तयोश्च लंघन मे
दत्वाद्वृंहणस्यानौषधत्वे प्राप्ते वृंहणं शमनमेवेत्याह वृंहणं शमनं त्विति शुद्धस्यापित्त
स्य ... स्य वा यो विषमस्य शमीकरणं च्छमनं वृंहणस्य विषममाह वृंहणेस्या
दि ग्रीष्मे परानपि स्वस्थानपि वृंहणान्याह मांसक्षीरेत्यादि मधुरस्निग्धैर्वस्तिभिः श
य्यासुखं निद्रां विनाशयनेऽवस्थानं निर्वृत्तिः संतोषः हर्षेणमानंदः लंघनस्य विषमाह पू२
मेह्यामदोषेत्यादि आमदोषोजीर्णं लंघनमेदस्य शोधनविषयमाह तत्र संशोधनैरिति
व्याधिकृत्स्नैत्यादीन् लंघनीयांश्च शोधनैर्लंघयेत् पाचनदीपनयोर्विषयमाह आमदो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बृंहणं प्राप्ते निषेधमाह न बृंहयेदिति बृंहणीयेषु पुरुषेषु लंघनसाध्यरोगोत्पत्तौ ५

चेति विबंधगौरवेति मध्यस्थौल्यादिकानिति आमदोषादिभिरार्त्तान् मध्यस्थौल्यादिका
न्पूर्वं पाचनदीपनैर्लंघयेत् पश्चाच्छोधनैः सुतृप्ते विषयमाह एभिरेवेति सुतृप्तमानिग्र
हैरिति एभिरामदोषादिभिः व्यायामातपमारुतानां विषयमाह दोषैरल्पार्त्तानिति मध्य
बले दोषैरार्त्तान् समीकरणादिभिर्लंघयेत् किं पुनरल्पबले रार्त्तान् सुतरां हीनबले गा
त्तान् लंघयेदेवेत्यर्थः लंघनीयेषु पुरुषेषु बृंहणसाध्यरोगोत्पत्तौ स्वल्पं लंघनं कार्यमित्याह ब
ह्वांस्त्विति देशादिवशेन तन्यथाप्युपाचरेत्याह पुष्टाश्चेति तान् लंघ्यान् बृंहयांश्च अथ बृंह
तलंघनलक्षणं तत्र बृंहितस्य लक्षणमाह बृंहतेत्यादि ति लंघितलक्षणमाह विमलेन्द्रियतेति
सुतृप्त इति व्याधिमार्दवमिति सर्गो मलानां मलप्रवृत्तिः अतिबृंहतातिलंघनयोर्लक्षणमाह अ
नपेक्षितेत्यादि अतिस्थौल्येति मात्रादेशकालादीननपेक्ष्यातिसेवितं बृंहणमतिस्थौल्यादीन्
कुरुते लंघनं। अतिकार्श्यादीन् कृते स्थौल्यादद्योतिकार्श्यादयश्चेत्यत आह वक्ष्यतेते चेति अति
स्थौल्यादीनां कार्य वा कथं लक्षणत्वमित्यत आह रूपं तेरैति यत्र कार्येक समाधिगम्य कारणं

वे।

789 5

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र कार्यमेवलसणमित्यर्थः अतिस्थौल्यादीनाह अतिस्थौल्यापचीति कार्श्यसन्यासेति
अतिबृंहणं कुर्यादित्यध्याहारः अतिस्थौल्यादीनामौषधमाह तत्र मेदोनिलश्लेष्मनाशनं
मिति कुलत्थेति रसांजनादींश्चतुरो योगानाह रसांजनस्येति शिलाजतुप्रयोगश्चेति सा
ग्निमंथरस इति चतुर्भिः संबध्यते अग्निमंथस्तर्कारी तत्स्वरसः विडंगादियोगमाह विडंगमि
ति यवामलकचूर्णमिति क्षारो यवक्षारः काले लोहरजो लोहचूर्णं व्योषादियोगमाह
व्योषकट्वीति हिंगुसौवर्चलेति निशे बृहत्याविति एषामिति सक्तुभिरिति अतिस्थौल्या
दिकानिति हृद्रोगकामलेति बुद्धिमेधास्मृतिकरमिति केंबुकान्मूलं केंबुकं स्वनामप्रसि
द्धं षोडशगुणे चूर्णापेक्षया पीतं शीतोदकेन संग्रहेतु गुर्वादि वर्द्धितीन श्लेष्मभिश्चा
न्नजो रसः आम एव ग्रन्थीकुर्वन्धातून् स्थौल्यमुपनयेत्त २ अतिस्थौल्यादिति क्षुत्तृट्स्वेद
श्वासातिनिद्रताः आयासासमता जाड्यमल्पायुर्बलवेगताः २ दौर्गंध्यं गदगदत्वं च भवेन्मे
दो[illegible]ति पुष्पितः स्रोतस्सु मेदोरुद्धेषु वायुः कोष्ठविशेषवन्नः ३ चरन्स ज्वालयत्यग्निं क्षुत्तृषोस्म

सं ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गंधाविद्वार्यांघ्रा बृष्याश्चो ध्यथोहिताः लेघनोस्य बृंहगेषु शेषेष्वप्युपकल्पयेत्
४ यत्तद्वातेसमर्थः सर्पिष्क्षाभ्यासेन पुष्टेः सद्यः दौर्बल्यतः सद्यो बृंहणेनौचीयते
५ चिरं क्रमेण च क्षीणस्तदभ्यासेन तत्र च बृंहणं देहमात्राग्निबलादीन्वीक्ष्य योजयेत् ६४
६ क्त व्याद्यमांसरसा लघ्वाशः कलावीर्य कालेपयुक्तेस्मवारीक्षितेस्तै जांगलेभ्यः कृतान्
रा५ कृतान् रसांस्तथा च सौहित्येन तर्पणं तर्पणान्यनुः शुद्धान्त्र शानां ज्वरिणां कासिनां प्र
त्रक्ष्ण छिंदुणां ८ तत्रपद्यतामूत्रवातानां मूढमारुतवर्च्चसां समग्नान्यसितातैलक्षौद्राज्या
हि सतर्प्पणः ९ मंथस्तक्तसिताक्षौद्रमद्यमदिरासक्तुयोजितः पाणिनं लक्ष्व सर्पिदधि
मंडोऽम्लकांजिकं १० तर्प्पणं मूत्रद्रं शुष्कमुद्रावर्त्तहरं परं मंथखर्जूरमृद्वीकावृक्षा
कृ५ म्लाम्लकदाडिमैः ११ परूषकैः सामलकैर्युक्तः स्यात्मद्यरोगजित् स्वादुरम्लोऽव
ल क्रत्सस्नेहो रूक्षएव वा १२ सद्यस्तर्पणो मंथः स्थैर्यवर्णबलप्रदः इति स्थौल्यका
र्श्ययोः संक्षेपादौषधमाह गुरुचातर्पणमित्यादि यवगोधूममित्यादि गुरुत्वे स
तिपदस्यतर्पणंतत्स्थूले हितं न घुत्वे सति यत्संतर्पणंतत्कृशेहितं यवाश्च गोधूमाश्च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰सं॰१५९

यत्र गोधूमं तदुभयोः स्थूलकृशयोः क्रमेण हितं तत्र तदुचितकृतकल्पनं यथा स्थूले
स्म २ तैलतक्रादि ... भक्ताः कृशे घृतक्षीरादिसिद्धाः संगृहेतु स्थौल्यकार्श्ये पुनः त्यापि
स्यातां तत्रायं विधिः संततं तु व्याधिवत्तासदा योज्या विमन्यत्र मात्रादियुक्तौ सेवेत
यत्स्य बृंहणं लंघने समधातुवग्निदेहो सौ समसंहननो भवेत् दृढेंद्रियबलत्वाद्वा न द्वं
द्वैराभिभूयते इति स्नेहनं रूक्षणं कर्म इत्यादिना सर्वोपक्रमाणां पृथक्त्वेप्युक्तं द्व ९५
यंत भावेऽक्तः इदानीं तेषां पृथक्त्वमेव कुत इत्यत आह दोषगत्येति दोषगत्यादो॰
षरसत्वेन यथा यथा दोषा भिद्यंते तथा तथोपक्रमाभिद्यंते यथा प्रवृत्तिः प्रवृत्ते नाही श्रव
तो भेदो दाहे शीत शीते उष्ण इत्यादि पृथक्त्वे हेतुश्चेत् पृथक्त्वं वास्तु नेत्याह नत
द्वित्वादिति द्वित्वान्नातिरिच्यंते बृंहणत्वं लंघनत्वं वा सामान्यं न त्यज्यंति यथा नाना मे ४
विधा अपि गदाः सामत्वं निरामत्वं इति हेमाद्रिटीकायामायुर्वेदरसायने युपक्रमप्रक
रणं सामस्त्येन निरूपितम् अथ शोधनादिगणीयमध्यायं व्याख्यातुं प्रतिजानीते ०

हे॰५९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रंथेपि तत्र वमनगणमाह मदनमधुकेत्यादि मदनो गालः मधुकं यष्टीमधुकं लंबा
तुंबी निंबः पिचुमंदः विंबी तुंडिकेरी विशाला इंद्रवारुणी त्रपुसं वालुकं कुटजो वत्सकः
मूर्वा मधुरसा देवदाली जीमूतकः कृमिघ्नं विडंगं विदुलो वेतसः दहनश्चित्रकः चित्रा
दंती चित्रांडुकः पटोलफले कोशावत्यौ कटुकोशातकी राजकोशातकी च करंजो
नक्तमालः कल्याणी पिप्पली लवणं सैंधवं वचा उग्रा एला त्रुटिः सर्षपाः सर्षपाः स्त्रोघ्नः
छर्दनानीति बहुवचनं गुणबहुत्वार्थं तेन वमनादिद्रव्याणां यस्यकस्यचित्रिकच
तुष्कपंचकादेः प्रयोजकत्वं उक्तं च सुश्रुतेन सगस्य वर्गमर्द्धं वा यथालाभमथापि वा
प्रयुंजीत भिषक् प्राज्ञो यथा दृष्टेषु कर्मसु इति उपलक्षणं चेदं अत एव संग्रहकारो ऽधि
कमधीते मदनजीमूतकेक्ष्वाकुकोशातकीद्वयफलपुष्पपत्राणि कुटजकरंजत्र
पुससर्षपपिप्पलीविडंगैलावत्सकपुष्पीहरेणुपृथ्वीकाकुस्तुंबरीप्रपुन्नाटानां
फलानि शारदानि हस्तिपर्णी कोविदारकर्बुदारारिष्टाश्वगंधानागविडंगलवीं बीधू
जीवकश्वेतापाणपुष्पीसदापुष्पीवचाचित्राचित्रकमूर्वारुइंद्रवारुणीसुखवी
गो

श्री २

चतुरंगुलः स्योनाकः कटुकपाटलापाटली शार्ङ्गेष्टामधुकमूर्वासप्तपर्णसोमवल्कदीपि
पिपुलुमनः सोमस्यापयवानी वृश्चीवपुनर्नवा महासहा क्षुद्रसहे स्युकांडकत्तक तिष्य
नी मूलंच विकलदीर्क्षीरमूलानि शाल्मलीशाल्मलूका मद्गुवर्ण्यएवएवपोटकोः
शलक धन्वन रसांजन राजादनो एडचित्रागोपश्रंगादिका पिच्छः प्रियंगुपुष्पं ताः
लीशं पत्रं हरिद्रा भृंगवंरकं दौर्मधूकदारुहरिद्रासारो तगुरगुड्‌चो मधुका लित्ती
रत्नवणानीति चवमनोपयोगीनीति विरेचनगणमाह निकुंभकं मेति निकुंभोदंतीकुं
भत्रिवृत त्रिफलाग्रस्त्रिद्भः गवादी श्वेतपुष्पं द्रुवारुणी सुकुसुमहे शंखनी कालांजनी स
दृशी श्वेतपुष्पा नीलांजनीका नीलका तिल्वकोरोधुलंपाकः आरग्वधः कंपिल्लोरक्तां
गः हेमदुग्धा हेमावती कंकुष्ठप्रकृतिः संग्रहेत्वाधिकमुक्तं त्रिवृ काकार्मदंती द्रवंती शं
खिनी सप्तलाजगंधा नम्रंगी वचा गवाक्षी कगलांत्री सुवर्णक्षीरी चित्रवल्ली हीद्रस्व
पंचमूलं वृश्चीवपुनर्नवापलं कषायशालमूलानि विल्वकरस्पंदककंपिल्लं कपाटली
त्वचः त्रिफलापिलूपियालबकूलवदरककंधु काश्मर्यपरूषकद्राक्षाशंखिनी क्षी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्तिल्वकोरीतकादिकार्षविडंगपूगपंचांगुलफलानि चतुरंगुलफलपत्राणि महावृक्षस्नुक्प
